CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

होता है और उत्तरमें त्यागकर्मका अधिकार होता है। इसीका विस्तारके साथ कर्म-धर्मके नामसे गीताके ७०० श्लोकोंमें वर्णन किया गया है। कर्म ( कीर्ति ) कानसे सुना जाता है और धर्म (शरीर) चक्षुसे दीखता है; श्रुतिसे अधिकार-कर्म जाना जाता है, लक्षणासे प्रिय और अप्रिय समझकर भोग होता है। कर्मेन्द्रियों के त्यागसे उत्तरकर्म बनता है और ज्ञानेन्द्रियोंके भोगसे संन्यास होता है। यही दो कर्म मुख्य हैं, और यही वेद पुरुपका स्वरूप है। इससे यही सिद्ध होता है कि—वेद बीजस्वरूप है, क्योंकि भूतमें उसका नाम है, और भविष्यमें उसका वृक्ष, फल, और बीज है।

0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGango

# मंगलाचरण




तं वेदपुरुषं नौमि लोकाः स्युर्यदनुग्रहात् ।
अध्यस्तं च जगत्तस्मिन् शोधयन्ति मनीषिणः ।।

0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

# अष्टादशश्लोकी वेदगीता

( १ )

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥

गीता, अ० २, श्लो० २१

( २ )

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥

गीता, अ० ७, श्लो० २६

( ३ )

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥

गीता, अ० ८, श्लो० २८

( ४ )

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥

गीता, अ० १०, श्लो० २२

( ५ )

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥

गीता, अ० २, श्लो० ४५

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGango

( ६ )

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥

गीता, अ० ८, श्लो० ११

( ७ )

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥

गीता, अ० ११, श्लो० ४८

( ८ )

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥

गीता, अ० ११, श्लो० ५३

( ९ )

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥

गीता, अ० २, श्लो० ४२

( १० )

यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥

गीता, अ० २, श्लो० ४६

0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

( ११ )

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥

गीता, अ० २, श्लो० ५२

( १२ )

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥

गीता, अ० ४, श्लो० ५

( १३ )

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥

गीता, अ० ७, श्लो० ८

( १४ )

सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहम् ॥

गीता, अ० १५, श्लो १५

( १५ )

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

गीता, अ० १५, श्लो० १८

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

( १६ )

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥

गीता, अ० १७, श्लो० २३

( १७ )

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद् वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥

गीता, अ० २, श्लो० २९

( १८ )

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥

गीता, अ० १५, श्लो० १

0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

# वेदगीतार्थदीपिका

## (१) शाङ्करी (२) श्रीधरी तथा (३) भावार्थबोधिनी ।

(१)

**वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।**
**कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥**

गीता, अ० २, श्लो० २१

य एनं वेत्ति हन्तारं ( गी० २. १९ ) इत्यनेन मन्त्रेण हननक्रियायाः कर्ता कर्म च न भवतीति प्रतिज्ञाय "न जायते" ( गी० २. २० ) इत्यनेनाविक्रियत्वे हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहरति—

( शाङ्करभाष्यम् ) वेदाविनाशिनमिति—वेद विजानात्यविनाशिनमत्यन्ताभावविकाररहितं नित्यं विपरिणामरहितं यो वेदेति सम्बन्धः । एनं पूर्वेण मन्त्रेणोक्तलक्षणमजं जन्मरहितमव्ययमपक्षयरहितं कथं केन प्रकारेण स विद्वान्पुरुषोऽधिकृतो हन्ति हननक्रियां करोति, कथं वा घातयति हन्तारं प्रयोजयति । न कथञ्चित्कञ्चिद्धन्ति न कथञ्चित्कञ्चिद् घातयतीत्युभयत्राक्षेप एवार्थः, प्रश्नार्थासम्भवात् । हेत्वर्थस्य अविक्रियत्वस्य च तुल्यत्वाद्विदुषः सर्वकर्मप्रतिषेध एव प्रकरणार्थोऽभिप्रेतो भगवतः ।

हन्तेस्त्वाक्षेप उदाहरणार्थत्वेन कथितः । विदुषः कं कर्मासम्भवे हेतुविशेषं पश्यन्कर्माण्याक्षिपति भगवान् कथं स पुरुष



C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति । ननूक्त एवात्मनोऽविक्रियत्वं सर्वकर्मासम्भवकारणविशेषः सत्यमुक्तः, न तु स कारणविशेषोऽन्यत्वाद्विदुषोऽविक्रियादात्मनः । न ह्यविक्रियं स्थाणुं विदितवतः कर्म सम्भवतीति चेन्न, विदुष आत्मत्वात्, न देहादिसङ्घातस्य विद्वत्ता । अतः पारिशेष्याद-संहत आत्मा विद्वानविक्रिय इति तस्य विदुषः कर्मासम्भवादाक्षेपो युक्तः—कथं स पुरुष इति । तथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्या-विक्रिय एव सन् बुद्धिवृत्त्यविवेकविज्ञानेनाविद्ययोपलब्धात्मा कल्प्यते, एवमेवात्मनात्मविवेकज्ञानेन बुद्धिवृत्त्या विद्ययाऽसत्यरू-पयैव परमार्थतोऽविक्रिय एवात्मा विद्वानुच्यते । विदुषः कर्मास-म्भववचनाद्यानि कर्माणि शास्त्रेण विधीयन्ते, तान्यविदुषो विहिता-नीति भगवतो निश्चयोऽवगम्यते ।

ननु विद्याऽप्यविदुष एव विधीयते, विदितविद्यस्य पिष्टपेषणवद्वि-द्याविधानानर्थक्यात् । तत्राविदुषः कर्माणि विधीयन्ते, न विदुष इति विशेषो नोपपद्यते इति चेन्न, अनुष्ठेयस्य भावाभावविशेषोपपत्तेः । अग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाधनोपसं-हारपूर्वकमनुष्ठेयं 'कर्ताऽहम्' 'मम कर्तव्यम्' इत्येवंप्रकारकविज्ञानव-तोऽविदुषो यथाऽनुष्ठेयं भवति, न तु तथा, न जायत इत्याद्यात्मस्वरू-पविध्यर्थज्ञानोत्तरकालभावि किञ्चिदनुष्ठेयं भवति । किन्तु 'नाहं कर्ता' 'नाहं भोक्ता' इत्याद्यात्मैकत्वाकर्तृत्वादिविषयज्ञानादन्यन्नोत्पद्यत इत्येष विशेष उपपद्यते । यः पुनः कर्ताऽहमिति वेत्त्यात्मानं तस्य ममेदं कर्तव्यमित्यवश्यम्भाविनी बुद्धिः स्यात्तदपेक्षया सोऽधि-

0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

क्रियत इति तं प्रति कर्माणि सम्भवन्ति, स चाविद्वान् "उभौ तौ न विजानीतः" [ गी० २ । १९ ] इति वचनात् । विशेषितस्य च विदुषः कर्माक्षेपवचनाच्च कथं स पुरुष इति ।

तस्माद्विशेषितस्याविक्रियात्मदर्शिनो विदुषो मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारः । अतएव भगवान्नारायणः साङ्ख्यान्विदुषोऽविदुषश्च कर्मिणः प्रविभज्य द्वे निष्ठे ग्राहयति—"ज्ञानयोगेन साङ्ख्यानां कर्मयोगेण योगिनाम्" [गी० ३।३ ] तथा च पुत्रायाऽऽह भगवान् व्यासः—"द्वाविमावथ पन्थानौ" [ म०भा०, शान्तिप० २४० । ६ ] इत्यादि ।

तथा च क्रियापथश्चैव पुरस्तात्पश्चात्संन्यासश्चेति । एतमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान् । अतत्त्ववित् "अहंकारविमूढात्मा कर्ताऽहमिति मन्यते" [ गी० ३ ।२७ ] तत्त्ववित्तु नाहं करोमीति । तथा च "सर्वकर्माणि मनसा सन्यस्यास्ते" [ गी० ५ । १३ ] इत्यादि ।

तत्र केचित्पण्डितम्मन्या वदन्ति—जन्मादिषड्भावविक्रियारहितोऽविक्रियोऽकर्तैकोऽहमात्मेति न कस्यचिज्ज्ञानमुत्पद्यते यस्मिन्सति सर्वकर्मसन्यास उपदिश्यत इति, तन्न, "न जायते" इत्यादिशास्त्रोपदेशानर्थक्यप्रसङ्गात् । यथा च शास्त्रोपदेशसामर्थ्याद्धर्माऽधर्मास्तित्वविज्ञानं कर्तुश्च देहान्तरसम्बन्धिविज्ञानं चोत्पद्यते, तथा शास्त्रात्तस्यैवात्मनोऽविक्रियत्वाकर्तृत्वैकत्वादिविज्ञानं कस्मान्नोत्पद्यत इति प्रष्टव्यास्ते । करणागोचरत्वादिति चेन्न, "मन

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGango

सैवानुद्रष्टव्यम्'' [ बृ० ४,४,१९ ] इति श्रुतिः। शास्त्राचार्योपदेश-शमदमादिसंस्कृतं मन आत्मदर्शने करणम्। तथा च तदधिगमाया-नुमाने आगमे च सति ज्ञानं नोत्पद्यत इति साहसमात्रमेतत्। ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानमवश्यं बाधत इत्यभ्युपगन्त-व्यम्। तच्चाज्ञानं दर्शितं हन्ताऽहं हतोऽस्मीति ''उभौ तौ न विजानीतः'' [ गी० २,१९ ] इति। अत्र चात्मनो हननक्रियायाः कर्तृत्वं कर्मत्वं हेतुकर्तृत्वं चाज्ञानकृतं दर्शितम्। तच्च सर्वक्रिया-स्वपि समानम्, कर्तृत्वादेरविद्याकृतत्वमविक्रियत्वादात्मनः। विक्रि-यावान् हि कर्ताऽऽत्मनः कर्मभूतमन्यं प्रयोजयति कुर्विति। तदेतद-विशेषेण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेध-ति भगवान् वासुदेवः विदुषः कर्माधिकाराभावप्रदर्शनार्थं 'वेदाविनाशिनं········कथं स पुरुषः पार्थ' इत्यादिना। क्व पुनर्विदुषोऽधिकार इत्येतदुक्तं पूर्वमेव ''ज्ञानयोगेन साङ्ख्यानाम्'' [ गी० ३,३ ] इति। तथा च सर्वकर्मसंन्यासं वक्ष्यति ''सर्व-कर्माणि मनसा'' [ गी० ५,१३ ] इत्यादिना।

ननु मनसेति वचनान्न वाचिकानां कायिकानां च संन्यास इति चेन्न, सर्वकर्माणीति विशेषितत्वात्। मानसानामेव सर्वकर्मणामिति चेन्न, मनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनो व्यापाराभावे तदनुपपत्तेः। शास्त्रीयाणां वाक्कायकर्मणां कारणानि मानसानि कर्माणि वर्जयित्वाऽन्यानि सर्वकर्माणि मनसा संन्यस्यास्ते इति चेन्न, ''नैव कुर्वन्न कारयन्'' [ गी० ५,१३ ] इति विशेषणात्।

0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

सर्वकर्मसंन्यासोऽयं भगवतोक्तो मरिष्यतो न जीवित इति चेन्न, नवद्वारे पुरे देही······आस्ते [ गी० ५, १३ ] इति विशेषणानुपपत्तेः। न हि सर्वकर्मसंन्यासेन मृतस्य तद्देह आसनं सम्भवति।

अकुर्वतोऽकारयतश्च देहे संन्यस्येति सम्बन्धो न देह आस्त इति चेन्न, सर्वत्रात्मनोऽविक्रियत्वावधारणात् आसनक्रियायाश्चाधिकरणापेक्षत्वात्तदनपेक्षत्वाच्च संन्यासस्य। सम्पूर्वस्तु न्यासशब्दस्त्यागार्थो न निक्षेपार्थः। तस्माद् गीताशास्त्रे आत्मज्ञानवतः संन्यास एवाधिकारो न कर्मणि इति तत्र तत्रोपरिष्टादात्मज्ञानप्रकरणे दर्शयिष्यामः ॥२१॥

(श्रीधरीव्याख्या) वेदेति—नित्यं वृद्धिशून्यम्, अव्ययमपक्षयशून्यम्, अजमविनाशिनं च यो वेद स पुरुषः कं हन्ति कथं वा हन्ति, एवम्भूतस्य वधे साधनाभावात्। तथा स्वयं प्रयोजको भूत्वाऽन्येन कं घातयति। न कञ्चिदपि कथञ्चिदपीत्यर्थः। अनेन मय्यपि प्रयोजकत्वाद्दोषदृष्टिं मा कार्षीरित्युक्तं भवति ॥

( भावार्थबोधनी ) वेदाविनाशिनं नित्यमिति—शास्त्रमें वर्तमानकालमें, जिससे पूर्वकी कर्मजाति मनमें और जातिकर्म भावमें आता है, उसका नाम वेद है। जैसे—शरीरके अन्दर मन वेद है। उसी तरह वनस्पतिके फलके अन्दर बीज भी वेद है। कर्मधर्मका जाति के अनुसार भोग होकर वर्तमान शरीरका नाश होता है। भूतकालकी क्रिया कर्म और जातिसे भविष्यमें फल और शरीर उत्पन्न होता है। यह बीज और मन नित्य है। फल

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGango

व्यय है, तथा शरीर अनित्य है। जैसे–शरीरमें पुरुषही वेदपुरुष है, उसी प्रकार बीजमें भी वेदपुरुष है। आमकी गुठली बो देने पर गुठलीरूपी शरीरका नाश होकर अङ्कुरसे फिर वही आम्र-बीज प्रादुर्भूत होता है। यही बीजरूपी वेदपुरुष है। इसी-को समझना चाहिये। यही ऊपरके श्लोकसे कहा गया है।

(२)

वेदाहं समतीतानि वर्तमानानि चार्जुन।
भविष्याणि च भूतानि मां तु वेद न कश्चन॥

गीता, अ० ७, श्लो० २६

यत एवमतः—

(शाङ्करभाष्यम्) वेदेति——अहन्तु वेद जाने समतीतानि समतिक्रान्तानि भूतानि, वर्तमानानि चार्जुन, भविष्याणि च भूतानि वेदाहम्, मां तु वेद न कश्चन, मद्भक्तं मच्छरणमेकं मुक्त्वा मत्तत्त्ववेदनाभावादेव न मां भजते॥ २६॥

सर्वोत्तमं मत्स्वरूपमजानन्त इत्युक्तम्—तदेव स्वस्य सर्वोत्तमत्वमनावृत्तज्ञानशक्तित्वेन दर्शयन्नन्येषामज्ञानमेवाह—

(श्रीधरीव्याख्या) वेदेति। समतीतानि विनष्टानि वर्तमानानि भावीनि च त्रिकालवर्तीनि भूतानि स्थावरजङ्गमानि सर्वाण्यहं वेद जानामि, मायाऽश्रयत्वान्मम तस्याः स्वाश्रयव्यामोहकत्वा-भावादिति प्रसिद्धम्। मां तु न कोऽपि वेत्ति, मन्मायामोहितत्वात्। प्रसिद्धं हि लोके मायायाः स्वाश्रयाधीनत्वमन्यमोहकत्वं च॥२६॥

0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

( भावार्थबोधिनी ) वेदाहं समतीतानीति—बीज अपनी जातिके स्वभावसे बीजके समान ही अङ्कुर उत्पन्न करता है। और वर्तमान कालमें जो भाव था वह भूतसे आता है वही भविष्यमें जाता है। वह सर्वत्र सम है।

( ३ )

वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम्।
अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम्॥

गीता, अ० ८, श्लो० २८

शृणु तस्य योगस्य माहात्म्यम्—

( शाङ्करभाष्यम् ) वेदेष्विति। वेदेषु सम्यगधीतेषु, यज्ञेषु च साद्गुण्येनानुष्ठितेषु तपःसु च सुतप्तेषु दानेषु च सम्यग्दत्तेषु, एतेषु यत्पुण्यफलं प्रदिष्टं शास्त्रेणात्येत्यतीत्य गच्छति तत्सर्वं फलजातम्, इदं विदित्वा सप्तप्रश्ननिर्णयद्वारेणोक्तमर्थं सम्यग-वधार्यानुष्ठाय योगी परं प्रकृष्टमैश्वरं स्थानमुपैति च प्रतिपद्यते, आद्यमादौ भवम्, कारणं ब्रह्मेत्यर्थः॥ २८॥

अध्यायार्थमष्टप्रश्नार्थनिर्णयं सफलमुपसंहरति—

( श्रीधरीव्याख्या ) वेदेष्विति। वेदेष्वध्ययनादिभिः, यज्ञे-ष्वनुष्ठानादिभिः, तपःसु कायशोषणादिभिः, दानेषु सत्पात्रार्पणा-दिभिः, यत्पुण्यफलमुपदिष्टं शास्त्रेषु तत्सर्वमत्येति ततोऽपि श्रेष्ठं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योगैश्वर्यं प्राप्नोति । किं कृत्वा । इदमष्टप्रश्नार्थनिर्णयेनोक्तं तत्त्वं विदित्वा ततश्च योगी ज्ञानी भूत्वा परमुत्कृष्टमाद्यं जगन्मूलभूतस्थानं विष्णोः परमं पदं प्राप्नोति ॥ २८ ॥

( भावार्थबोधिनी ) वेदेषु यज्ञेषु तपःसु चैव इति—वह बीजका अङ्कुर यज्ञ और तपसे बढ़कर वृक्ष बनता है । फिर वही पृथ्वीके रसको लेकर अपने स्वभावसे फल दिखाता है । यही सब वृक्षोंमें तथा शरीरमें स्व-स्वभावके अनुकूल पूर्वके योगसे ( जैसा बीजका स्वभाव था वैसा ही ) वर्तमानमें वृक्ष तथा शरीर बनता है ।

( ४ )

**वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।**
**इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥**

गीता, अ० १०, श्लो० २२

( शाङ्करभाष्यम् ) वेदानामिति—वेदानां मध्ये सामवेदोऽस्मि । देवानां रुद्रादित्यादीनां वासव इन्द्रोऽस्मि । इन्द्रियाणामेकादशानां चक्षुरादीनां मनश्चास्मि सङ्कल्पविकल्पात्मकं मनश्चास्मि । भूतानामस्मि चेतना कार्यकरणसङ्घाते नित्याऽभिव्यक्ता बुद्धिवृत्तिश्चेतना ॥ २२ ॥

( श्रीधरीव्याख्या ) वेदानामिति—वासव इन्द्रः । भूतानां सम्बन्धिनी चेतना ज्ञानशक्तिरहमस्मि ॥ २२ ॥

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

(भावार्थबोधिनी) वेदानां सामवेदोऽस्मि इति—वेदोंमें पूर्व-कर्मसे सामवेद मैं हूँ। देवोंमें बलसे इन्द्र मैं हूँ। इन्द्रियोंमें मन मैं हूँ और प्राणियोंकी आत्मासे चेतन मैं हूँ।

(५)

**त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।**
**निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥**

गीता, अ० २, श्लो० ४५

य एवं विवेकबुद्धिरहितास्तेषां कामात्मनां यत्फलं तदाह—

(शाङ्करभाष्यम्) त्रैगुण्येति। त्रैगुण्यविषयास्त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते वेदास्त्रैगुण्यविषयाः। त्वं तु निस्त्रैगुण्यो भवार्जुन निष्कामो भवेत्यर्थः। निर्द्वन्द्वः सुखदुःख-हेतू सप्रतिपक्षौ पदार्थौ द्वन्द्वशब्दवाच्यौ ततो निर्गतो निर्द्वन्द्वो भव। त्वं नित्यसत्त्वस्थः सदासत्त्वगुणाश्रितो भव। तथा निर्योगक्षेमोऽनुपात्तस्योपादानं योगः, उपात्तस्य रक्षणं क्षेमः, योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो निर्योगक्षेमो भव। आत्मवानप्रमत्तश्च भव। एष तवोपदेशः स्वधर्ममनुतिष्ठतः॥४५॥

ननु च यदि स्वर्गादिकं परमं फलं न भवति तर्हि किमिति वेदैस्तत्साधनतया कर्माणि विधीयन्ते तत्राह—

(श्रीधरीव्याख्या) त्रैगुण्यविषया इति। त्रिगुणात्मकाः सकामा येऽधिकारिणस्तद्विषयास्तेषां कर्मफलसम्बन्धप्रतिपादकाः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदाः । त्वं तु निस्त्रैगुण्यो निष्कामो भव । तत्रोपायमाह—निर्द्वन्द्वः सुखदुःखशीतोष्णादियुगलानि द्वन्द्वानि तद्रहितो भव । तानि सहस्वेत्यर्थः । कथमित्यत्राह—नित्यसत्त्वस्थः सन् धैर्यमवलम्ब्येत्यर्थः । तथा निर्योगक्षेमः । अप्राप्तस्वीकारो योगः, प्राप्तपरिपालनं क्षेमस्तद्रहितः । आत्मवान् अप्रमत्तः । नहि द्वन्द्वाकुलस्य योगक्षेमव्यापृतस्य च प्रमादिनस्त्रैगुण्यातिक्रमः सम्भवतीति ॥ ४५ ॥

(भावार्थबोधिनी) त्रैगुण्यविषया वेदाः—वेद तीन गुणोंका विषय है । जैसे कर्म, धर्म और फल । वेदमें पूर्वका कर्म है, उसीके अनुकूल शरीर बनता है । शरीरके धर्मसे बाह्य वस्तुमें प्रिय और अप्रिय बोध होकर फलका भोग होता है । वही सामने आता है और कर्तव्य बनता है । उसी क्रियाको करना चाहिये । प्रिय और अप्रियको समझकर कर्तव्यका त्याग न करना चाहिये ।

( ६ )

**यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ॥**

गी० अ० ८, श्लो० ११

पुनरपि वक्ष्यमाणेनोपायेन प्रतिपित्सितस्य ब्रह्मणो वेदविद्वदनादिविशेषणविशेष्याभिधानं करोति भगवान्—

(शाङ्करभाष्यम्) यदिति । यदक्षरं न क्षरतीत्यक्षरमविनाशि वेदविदो वेदार्थज्ञा वदन्ति "तद्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति" [ बृ. ३. ८. ८ ] इति श्रुतेः । सर्वविशेषनिवर्तक-

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

त्वेनाभिवदन्ति "अस्थूलमनणु" [ बृ. ३. ८. ८ ] इत्यादि। किञ्च विशन्ति प्रविशन्ति सम्यग् दर्शनप्राप्तौ सत्यां यद्यतयो यतनशीलाः संन्यासिनो वीतरागा वीतो विगतो रागो येभ्यस्ते वीतरागाः। यच्चाक्षरमिच्छन्तो ज्ञातुमिति वाक्यशेषः, ब्रह्मचर्यं गुरौ चरन्ति आचरन्ति तत्ते पदं तदक्षराख्यं पदं पदनीयं ते तुभ्यं सङ्ग्रहेण सङ्ग्रहः सङ्क्षेपस्तेन सङ्क्षेपेण प्रवक्ष्ये कथयिष्यामि ॥ ११ ॥

केवलादभ्यासयोगादपि प्रणवाधारमभ्यासमन्तरङ्गं विधित्सुः प्रा तजानीते।

( श्रीधरीव्याख्या ) यदक्षरमिति। यदक्षरं वेदान्तज्ञा वदन्ति "एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इति श्रुतेः। वीतो रागो येभ्यस्ते वीतरागा यतयः प्रयत्नवन्तो यद्विशन्ति। यच्च ज्ञातुमिच्छन्तो गुरुकुले ब्रह्मचर्यं चरन्ति। तत्ते तुभ्यं पदं पद्यते गम्यते इति पदं प्राप्यं सङ्ग्रहेण सङ्क्षेपेण प्रवक्ष्ये तत्प्राप्त्युपायं कथयिष्यामीत्यर्थः ॥ ११ ॥

( भावार्थबोधिनी ) यदक्षरं वेदविदो वदन्ति। वर्तमान शरीरमें ( अक्षरमन ) पूर्वके कर्मसे वेद है। वही बोलता है, और वही सुनता है। विषयको वीतराग होकर देखता है। पूर्वमें ब्रह्ममें जैसा आचार धारण किया है, वैसाही करता है, और कराता है।

( ७ )

**न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः।**
**एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर॥**

गीता, अ० ११, श्लो० ४८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मनो मम रूपदर्शनेन कृतार्थ एव त्वं संवृत्त इति तत्स्तौति—

(शाङ्करभाष्यम्) न वेदेति । न वेदयज्ञाध्ययनैः चतुर्णामपि वेदानामध्ययनैर्यथावद्यज्ञाध्ययनैश्च, वेदाध्ययनैरेव यज्ञाध्ययनस्य सिद्धत्वात्पृथग्यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपलक्षणार्थम्, तथा न दानैस्तुलापुरुषादिभिः, न च क्रियाभिरग्निहोत्रादिभिः श्रौतादिभिः, नापि तपोभिरुग्रैश्चान्द्रायणादिभिरुग्रैर्घोरैः, एवंरूपो यथादर्शितं विश्वरूपं यस्य सोऽहमेवंरूपः न शक्योऽहं नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन त्वत्तोऽन्येन कुरुप्रवीर ॥ ४८ ॥

एतद्दर्शनमतिदुर्लभं लब्ध्वा त्वं कृतार्थोऽसीत्याह—

(श्रीधरीव्याख्या) नेति—वेदाध्ययनातिरेकेण यज्ञाध्ययनस्याभावात् यज्ञशब्देन यज्ञविद्याः कल्पसूत्राद्या लक्ष्यन्ते । वेदानां यज्ञविद्यानां चाध्ययनैरित्यर्थः । न च दानैर्न च क्रियाभिरग्निहोत्रादिभिर्न चोग्रैस्तपोभिश्चान्द्रायणादिभिरेवंरूपोऽहं त्वदन्येन मनुष्यलोके द्रष्टुं शक्यः । अपि तु त्वमेव केवलं मत्प्रसादेन दृष्ट्वा कृतार्थोऽसि ॥ ४८ ॥

(भावार्थबोधिनी) न वेदयज्ञाध्ययनैर्न दानैरिति—शरीरमें मन और भाव ये दो हैं । भाव तो सामनेके विषयको देखता है, और मन भावके देखे हुए विषयको अपनेमें रखता है । भूतकालकी वस्तुको मन जानता है, भाव नहीं जानता । भविष्यमें भूतकालकी बात कहता

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

है। इससे भावका सम्बोधन करके मन कहता है कि—किये हुए कर्मको तुम नहीं जानते, मैं जानता हूँ।

( ८ )

**नाहं वेदैर्न तपसा न दानेन न चेज्यया।**
**शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥**

गी० अ० ११, श्लो० ५३

कस्मात्—

( शाङ्करभाष्यम् ) नाहमिति। नाहं वेदैर्ऋग्यजुःसामाथर्ववेदैश्चतुर्भिरपि न तपसोग्रेण चान्द्रायणादिना, न दानेन गोभूहिरण्यादिना, न चेज्यया यज्ञेन पूजया वा शक्य एवंविधो यथादर्शितप्रकारो द्रष्टुं दृष्टवानसि मां यथा त्वम्॥ ५३॥

तत्र हेतुः—

( श्रीधरीव्याख्या ) नाहमिति—स्पष्टार्थः॥ ५३॥

( भावार्थबोधिनी ) नाहं वेदैर्न तपसा इति। शरीर में मन कहता है कि भूतकालका विषय तुम्हारे सामने आता है, पर उसे तुम नहीं जानते, मैं उसका रूप और गुण जानता हूँ।

( ९ )

**यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।**
**वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥**

गीता, अ० २, श्लो० ४२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येषां व्यवसायात्मिका बुद्धिर्नास्ति ते—

( शाङ्करभाष्यम् ) यामिति—यामिमां वक्ष्यमाणां पुष्पितां पुष्पितवृक्ष इव शोभमानां श्रूयमाणरमणीयां वाचं वाक्यलक्षणां प्रवदन्ति । के ? अविपश्चितोऽल्पमेधसोऽविवेकिन इत्यर्थः । वेद-वादरता बह्वर्थवादफलसाधनप्रकाशकेषु वेदवाक्येषु रताः, हे पार्थ ! नान्यत् स्वर्गपश्वादिफलसाधनेभ्यः कर्मभ्योऽस्तीत्येवंवादिनो वदन-शीलाः ॥ ४२ ॥

ननु कामिनोऽपि कष्टान्कामान्विहाय व्यवसायात्मिकामेव बुद्धिं किं न कुर्वन्ति तत्राह—

( श्रीधरीव्याख्या ) यामिति—पुष्पितां पुष्पितविषलता-वदापातरमणीयां प्रकृष्टां परमार्थफलपरामेव वदन्ति वाचं स्वर्गा-दिफलश्रुतिं ये तेषां तया वाचाऽपहृतचेतसां व्यवसायात्मिका बुद्धिः समाधौ न विधीयत इति तृतीयेनान्वयः । किमिति तथा वदन्ति यतोऽविपश्चितो मूढाः । तत्र हेतुः—वेदे ये वादा अर्थवादाः "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" "अपाम सो-ममृता अभूम" इत्याद्यास्तेष्वेव रताः प्रीताः । अतएव अतः परमन्यदीश्वरतत्त्वं प्राप्यं नास्तीति वदनशीलाः ॥ ४२ ॥

( भावार्थबोधिनी ) यामिमां पुष्पितां वाचमिति—वर्त-मान शरीरमें पूर्वके कर्मका ज्ञान और शब्द पुष्पकी जगह है, और उससे फल विषय होता है । और वह दूसरे शरीरका

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

विषय होता है। इसलिए वह अपने वेदके फलमें रत है। वही फलको विषय करके भोगता है, और दूसरे विषयका वाद करता है।

( १० )

**यावानर्थं उदपाने सर्वतः संप्लुतोदके ।**
**तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥**

गीता, अ० २, श्लो० ४६

सर्वेषु वेदोक्तेषु कर्मसु यान्युक्तान्यनन्तानि फलानि तानि नापेक्ष्यन्ते चेत्किमर्थं तानीश्वरायेत्यनुष्ठीयन्त इति उच्यते शृणु–

( शाङ्करभाष्यम् ) यावानिति। यथा लोके कूपतडागाद्यनेकस्मिन्नुदपाने परिच्छिन्नोदके यावान् यावत्परिमाणः स्नानपानादिरर्थः फलं प्रयोजनं स सर्वोऽर्थः सर्वतः संप्लुतोदकेऽपि तावानेव सम्पद्यते तत्रान्तर्भवतीत्यर्थः। एवं तावांस्तावत्परिमाण एव सम्पद्यते सर्वेषु वेदेषु वेदोक्तेषु कर्मसु योऽर्थो यत्कर्मफलं सोऽर्थो ब्राह्मणस्य संन्यासिनः परमार्थतत्त्वं विजानतो योऽर्थो यद्विज्ञानफलं सर्वतः सम्प्लुतोदकस्थानीयं तस्मिंस्तावानेव सम्पद्यते तत्रैवान्तर्भवतीत्यर्थः। "यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद् वेद यत्स वेद" [ छां० ४, १, ४ ] इति श्रुतेः, "सर्वं कर्माखिलम्" [ गी० ४, ३३ ] इति च वक्ष्यति। तस्मात्प्राग्ज्ञाननिष्ठाधिकारप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्तव्यम् ॥ ४६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ननु वेदोक्तनानाफलपरित्यागेन निष्कामतयेश्वराराधनविषया व्यवसायात्मिकाबुद्धिस्तु कुबुद्धिरेवेत्याशङ्क्याऽऽह—

( श्रीधरीव्याख्या ) यावानिति । उदकं पीयतेऽस्मिन्निस्युदपानं वापीकूपतडागादि तस्मिन् स्वल्पोदके एकत्र कृत्स्नस्यार्थस्याभावात्तत्र तत्र परिभ्रमणेन विभागशो यावान्स्नानपानादिरर्थः प्रयोजनं भवति, तावान्सर्वोऽप्यर्थः सर्वतः सम्प्लुतोदके महाह्रदे एकत्रैव यथा भवति, एवं यावान्सर्वेषु वेदेषु तत्तत्कर्मफलरूपोऽर्थस्तावान्सर्वोऽपि विजानतो व्यवसायात्मकबुद्धियुक्तस्य ब्राह्मणस्य ब्रह्मनिष्ठस्य भवत्येव, ब्रह्माऽऽनन्दे क्षुद्राऽऽनन्दानामन्तर्भूतत्वात् "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः। तस्मादियमेव बुद्धिः सुबुद्धिरित्यर्थः ॥४६॥

( भावार्थबोधिनी ) यावानर्थ उदपाने । यावान् यानी संसारमें सारा विषय जगत्के अनुकूल ( अर्थ ) होता है । प्रत्येक शरीरमें पूर्व संस्कारके अनुकूल वह वेद रहता है । वही ब्राह्मण है, और वही जानता है । वर्तमानमें संसार एक समुद्रकी तरह है । पुरुष कूपकी जगह है, और स्त्री वापीकी जगह है । पुरुषका कार्य त्याग कर्म है, और स्त्रीका कार्य ग्रहण करना है । कूप अपने जलको ऊपरसे ग्रहण करनेवालोंके लिए त्याग करता है । बावड़ी ऊपरसे मेघका तथा भीतरसे कूपका भी जल ग्रहण करती है । समुद्रका कार्य सबकी परस्पर सहायता करना है । इसी दृष्टान्तके अनुसार पुरुष और स्त्रीका व्यवहार है ।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

( ११ )

**यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।**
**तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥**

गीता, अ० २, श्लो० ५२

योगानुष्ठानजनितसत्त्वशुद्धिजा बुद्धिः कदा प्राप्स्यत इत्युच्यते—

( शाङ्करभाष्यम् ) यदेति । यदा यस्मिन्काले ते तव मोह-कलिलं मोहात्मकमविवेकरूपं कालुष्यं येनात्मानात्मविवेकबोधं कलुषीकृत्य विषयं प्रत्यन्तःकरणं प्रवर्तते तत्तव बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति अतिशुद्धभावमापत्स्यत इत्यर्थः । तदा तस्मिन् काले गन्ताऽसि प्राप्स्यसि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुतस्य च, तदा श्रोतव्यं श्रुतं च ते निष्फलं प्रतिपद्यत इत्यभिप्रायः ॥ ५२ ॥

कदा तत्पदमहं प्राप्स्यामीत्यपेक्षायामाह—

( श्रीधरीव्याख्या ) यदेति द्वाभ्याम् । मोहो देहादिष्वात्म-बुद्धिः तदेव कलिलम् । "कलिलं गहनं विदुः" इत्यभिधानकोश-स्मृतेः । ततश्चायमर्थः—एवं परमेश्वराराधने क्रियमाणे यदा तत्प्रसादेन तव बुद्धिर्देहाभिमानलक्षणं मोहमयं गहनं दुर्गं विशेषे-णातितरिष्यति तदा श्रोतव्यस्य श्रुतस्य चार्थस्य निर्वेदं वैराग्यं गन्तासि प्राप्स्यसि । तयोरनुपादेयत्वेन जिज्ञासां न करिष्य-सीत्यर्थः ॥ ५२ ॥

( भावार्थबोधिनी ) यदा ते मोहकलिलमिति । शरीरके भावमें मोह है । संसाररूपी वन गहन है इसलिए यह अपने



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रयोजनकी वस्तु पहिचान नहीं सकता (अर्थात् सुन नहीं सकता और सुने विना देख नहीं सकता)। जब आत्मा बुद्धिमें निश्चय करावेगा तब प्रयोजन सिद्ध होता है। वह पूर्वके कर्मसे आत्मबुद्धिश्रुतिद्वारा निश्चय करनेपर अपने प्रयोजनके अनुसार उस गहन वनको पार करता है।

( १२ )

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥

गीता, अ० ४, श्लो० ५

या वासुदेवेऽनीश्वरासर्वज्ञाशङ्का मूर्खाणां तां परिहरञ्श्रीभगवानुवाच यदर्थो ह्यर्जुनस्य प्रश्नः—

(शाङ्करभाष्यम्) बहूनीति। बहूनि मे मम व्यतीतान्यतिक्रान्तानि जन्मानि तव च हे अर्जुन। तान्यहं वेद जाने सर्वाणि न त्वं वेत्थ न जानीषे धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वात्। अहं पुनर्नित्यशुद्धबुद्धमुक्तस्वभावत्वादनावरणज्ञानशक्तिरिति वेदाहं हे परन्तप ॥ ५ ॥

इति पृष्टवन्तमर्जुनं रूपान्तरेणोपदिष्टवानित्यभिप्रायेणोत्तरम्—श्रीभगवानुवाच।

(श्रीधरीव्याख्या) बहूनीति। मम बहूनि जन्मानि तव च व्यतीतानि। तानि सर्वाण्यहं वेद जानामि, अलुप्तविद्याशक्तित्वात्। त्वं तु न वेत्थ न जानासि, अविद्यावृतत्वात् ॥ ५ ॥

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

(भावार्थबोधिनी) बहूनि मे व्यतीतानीति—शरीरमें ग्रहण करनेवाली ज्ञानेन्द्रिय हैं, और त्यागकर्म करनेवाली कर्मेन्द्रिय हैं। इनको ही भावशब्दसे कहा गया है। वह भाव वर्तमानकालका बोधक है। और मन भूत और भविष्यत् का बोधक है। वह भावके द्वारा वर्तमानका ज्ञान करता है। भूतकालिकज्ञान चित्त द्वारा होता है। मन नित्य है और भाव अनित्य है। दोनों इस शरीरमें हैं। और मन दूसरा शरीर बनाता है। वह कर्मरूपी वेद मन है। यही बात इस श्लोकसे ध्वनित है।

(१३)

**रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः।**
**प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥**

गीता, अ० ७, श्लो० ८

केन केन धर्मेण विशिष्टे त्वयि सर्वमिदं प्रोतमित्युच्यते—

(शाङ्करभाष्यम्) रस इति। रसोऽहमपां यः सारः स रसस्तस्मिन्रसभूते मय्यापः प्रोता इत्यर्थः। एवं सर्वत्र। यथाऽहमप्सु रसः, एवं प्रभास्मि शशिसूर्ययोः। प्रणव ओंकारः सर्ववेदेषु, तस्मिन् प्रणवभूते मयि सर्वे वेदाः प्रोताः। तथा खे आकाशे शब्दः सारभूतः, तस्मिन् मयि खं प्रोतम्। तथा पौरुषं पुरुषस्य भावो पौरुषं यतः पुंबुद्धिर्नृषु, तस्मिन्मयि पुरुषाः प्रोताः॥८॥

जगतः स्थितिहेतुत्वं प्रपञ्चयति—

(श्रीधरीव्याख्या) रसोऽहमिति पञ्चभिः। अप्सु रसोऽहम्। रसतन्मात्ररूपया विभूत्या तदाश्रयत्वेनाप्सु स्थितोऽहमित्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथा शशिसूर्ययोः प्रभास्मि चन्द्रेऽर्के च प्रकाशरूपया विभूत्या तदाश्रयत्वेन स्थितोऽहमित्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम्। सर्वेषु वेदेषु वैखरीरूपेषु तन्मूलभूतः प्रणव ओंकारोऽस्मि। खे आकाशे शब्दतन्मात्ररूपोऽस्मि। नृषु पुरुषेषु पौरुषमुद्यमोऽस्मि। उद्यमे हि पुरुषास्तिष्ठन्ति ॥ ८ ॥

( भावार्थबोधिनी ) रसोऽहमप्सु कौन्तेय—आत्मा ( अहम् ) रूप, ब्रह्म "रस" स्वरूप, और पुरुष "विषय" स्वरूप है। शरीरकर्मके भेदसे मन और प्राण पूर्वकर्मके स्वरूपसे रस बनकर शरीरका धारण और प्रकाश करता है। वह वेदमें ओंकार और प्रणव है। वही शब्द सुनता है और वही पुरुष-विशेषसे अर्थ भोगता है।

( १४ )

**सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।**
**वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥**

गीता, अ० १५, श्लो० १५

किञ्च—

( शाङ्करभाष्यम् ) सर्वस्येति। सर्वस्य प्राणिजातस्याहमात्मा सन् हृदि बुद्धौ संनिविष्टः। अतो मत्त आत्मनः सर्वप्राणिनां स्मृतिर्ज्ञानं तदपोहनम् अपगमनं च। येषां यथा पुण्यकर्मणां पुण्य-कर्मानुरोधेन ज्ञानस्मृती भवतः, तथा पापकर्मणां पापकर्मानु-रूपेण स्मृतिज्ञानयोरपोहनं च अपायनमपगमनं च। वेदैश्च सर्वैर-

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

हमेव परमात्मा वेद्यो वेदितव्यः। वेदान्तकृद्वेदान्तार्थसम्प्रदायकृदित्यर्थः। वेदविद्वेदार्थविदेव चाहम् ॥ १५ ॥

किञ्च—

( श्रीधरीव्याख्या ) सर्वस्येति। सर्वस्य प्राणिजातस्य हृदि सम्यगन्तर्यामिरूपेण प्रविष्टोऽहम्। अतश्च मत्त एव हेतोः प्राणिमात्रस्य पूर्वानुभूतार्थविषया स्मृतिर्भवति। ज्ञानं च विषयेन्द्रियसंप्रयोगजं भवति। अपोहनं च तयोः प्रमोषो भवति। वेदैश्च सर्वैस्तत्तद्देवतादिरूपेणाहमेव वेद्यः। वेदान्तकृत्तत्सम्प्रदायप्रवर्तकश्च ज्ञानदो गुरुरहमित्यर्थः। वेदविदेव च वेदार्थविदहमेव ॥ १५ ॥

( भावार्थबोधिनी ) सर्वस्य चाहं हृदि सन्निविष्ट इति— सब शरीरोंमें जाठराग्निके योगसे प्राण होकर ( जड़ और चेतनके ) हृदयमें पूर्वकर्मका मत लेकर वर्तमानमें पूर्वानुभूतकी स्मृति करता है। वह सब वेदोंमें रहकर वेदना करता है। पूर्वकर्मका भोग भोगकर उसका क्षय होता है, और आगेकी उत्पत्ति करता है। इसीसे शरीरका नाम वेदान्त है।

( १५ )

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

गीता, अ० १५, श्लो० १८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा व्याख्यातस्येश्वरस्य पुरुषोत्तम इत्येतन्नाम प्रसिद्धम्। तस्य नाम निर्वचनप्रसिद्ध्या अर्थवत्त्वं नाम्नो दर्शयन् निरतिशयोऽहमीश्वर इत्यात्मानं दर्शयति भगवान्—

( शाङ्करभाष्यम् ) यस्मादिति। यस्मात्क्षरमतीतोऽहं संसारमायावृक्षमश्वत्थाख्यमतिक्रान्तोऽहमक्षरादपि संसारमायावृक्षबीजभूतादपि चोत्तमः उत्कृष्टतमः ऊर्ध्वतमो वा, अतः ताभ्यां क्षराक्षराभ्यामुत्तमत्वादस्मि लोके वेदे च प्रथितः प्रख्यातः। पुरुषोत्तम इत्येवं मां भक्तजना विदुः। कवयः काव्यादिषु च इदं नाम निबध्नन्ति, पुरुषोत्तम इत्यनेनाभिधानेनाभिगृणन्ति ॥ १८ ॥

एवंभूतं पुरुषोत्तमत्वमात्मनो नाम निर्वचनेन दर्शयति—

( श्रीधरीव्याख्या ) यस्मादिति। यस्मात्क्षरं जडवर्गमतिक्रान्तोऽहं नित्यमुक्तत्वात्। अक्षराच्चेतनवर्गादप्युत्तमश्च नियन्तृत्वात्। अतो लोके वेदे च पुरुषोत्तमः इति प्रथितः प्रख्यातोऽस्मि। तथा च श्रुतिः—'स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति' इत्यादिः ॥ १८ ॥

( भावार्थबोधिनी ) यस्मात्क्षरमतीतोऽहमिति—इसलिए नाशको छोड़कर और पुरुषार्थको धारणकर लोक तथा वेदमें मैं पुरुषोत्तम नाम से प्रसिद्ध हूँ।

( १६ )

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥

गीता, अ० १७, श्लो० २३

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

यज्ञदानतपःप्रभृतीनां सादृगुण्यकरणायायमुपदेश उच्यते—

( शाङ्करभाष्यम् ) ॐ इति । ॐ तत्सत् इत्येवं निर्देशो, निर्दिश्यतेऽनेनेति निर्देशः, त्रिविधो नामनिर्देशो ब्रह्मणः स्मृतश्चिन्तितो वेदान्तेषु ब्रह्मविद्भिः । ब्राह्मणस्तेन निर्देशेन त्रिविधेन वेदाश्च यज्ञाश्च विहिता निर्मिताः पुरा पूर्वमिति निर्देशस्तुत्यर्थमुच्यते ॥ २३॥

ननु चैवं विचार्यमाणे सर्वमपि यज्ञतपोदानादि राजसतामसप्रायमेवेति व्यर्थो यज्ञादिप्रयासो इत्याशङ्क्य तथाविधस्यापि सात्त्विकत्वापादनप्रकारं दर्शयितुमाह—

( श्रीधरीव्याख्या ) ओमिति । ॐ तत्सदित्येवं त्रिविधो ब्रह्मणः परमात्मनो निर्देशो नाम व्यपदेशस्मृतः शिष्टैः । तत्र तावत् 'ओमिति त्रियद्ब्रह्म' इत्यादिश्रुतिप्रसिद्धेरोमिति ब्रह्मणो नाम, जगत्कारणत्वेनातिप्रसिद्धत्वात्, अविदुषां परोक्षत्वाच्च । तच्छब्दोऽपि ब्रह्मणो नाम । परमार्थसत्त्वसाधुत्वप्रशस्तत्वादिभिः सच्छब्दो ब्रह्मणो नाम 'सदेव सोम्येदमग्र आसीत्' इत्यादिश्रुतेः । अयं त्रिविधोऽपि नामनिर्देशो विगुणमपि सगुणकर्तुं समर्थ इत्याशयेन स्तौति । तेन त्रिविधेन ब्रह्मणो निर्देशेन ब्राह्मणाश्च वेदाश्च यज्ञाश्च पूर्वं सृष्ट्यादौ विहिताः विधात्रा निर्मिताः सगुणीकृता वा । यद्वा यस्यायं त्रिविधो निर्देशस्तेन परमात्मना ब्राह्मणादयः पवित्रतमाः सृष्टाः । तस्मात्तस्यायं त्रिविधो निर्देशोऽतिप्रशस्त इत्यर्थः ॥ २३॥

( भावार्थबोधिनी ) ॐ तत्सदिति—भूतकालके निर्देशसे वर्तमानका शरीर है । उसकी विधिको ज्ञानरूपी ब्राह्मण स्मरण करता है । उसी वेदसे ब्राह्मण यज्ञपुरीको अनुकूल चलाता है ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

( १७ )

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥

गीता, अ० २, श्लो० २९

दुर्विज्ञेयोऽयं प्रकृत आत्मा किं त्वामेवैकमुपालभे साधारणे भ्रान्तिनिमित्ते । कथं दुर्विज्ञेयोऽयमात्मेत्यत आह—

( शाङ्करभाष्यम् ) आश्चर्यवदिति । आश्चर्यवदाश्चर्यमदृष्टपूर्वमद्भुतमकस्माद् दृश्यमानं तेन तुल्यमाश्चर्यवदाश्चर्यमिवैनमात्मानं पश्यति कश्चित् । आश्चर्यवदेनं वदति तथैव चान्यः । आश्चर्यवच्चैनमन्यः शृणोति । श्रुत्वा दृष्ट्वोक्त्वाप्येनं आत्मानं वेद न चैव कश्चित् । अथवा योऽयमात्मानं पश्यति स आश्चर्यतुल्यो यो वदति यश्च शृणोति सोऽनेकसहस्रेषु कश्चिदेव भवति । अतो दुर्बोध आत्मेत्यभिप्रायः ॥ २९ ॥

कुतस्तर्हि विद्वांसोऽपि लोके शोचन्ति, आत्मा ज्ञानादेवेत्याशयेनात्मनो दुर्विज्ञेयतामाह—

( श्रीधरीव्याख्या ) आश्चर्यवदिति । कश्चिदेनमात्मानं शास्त्राचार्योपदेशाभ्यां पश्यन्नाश्चर्यवत्पश्यति । सर्वगतस्य नित्यज्ञानानन्दस्वभावस्यात्मनोऽलौकिकत्वादैन्द्रजालिकवद्घटमानं पश्यन्निव विस्मयेन पश्यति असम्भावनाभिभूतत्वात् । तथा आश्च-

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

र्यवदन्यो वदति च। शृणोति चान्यः। कश्चित्पुनर्विपरीतभावनाभिभूतः श्रुत्वापि नैव वेद। चशब्दादुक्त्वापि दृष्ट्वापि न सम्यग्वेदेति द्रष्टव्यम् ॥ २९ ॥

( भावार्थबोधिनी ) आश्चर्यवदिति—शरीरमें पूर्वकर्मका ज्ञान चित्तमें रहता है। उसका नाम वेद है। वर्तमान शरीरमें विषयका ज्ञान होने से गुणका ज्ञान नहीं होता। इसलिए बोलनेमें, सुननेमें और देखनेमें आश्चर्य करता है। शरीरोंके भेदसे ही आश्चर्य है।

( १८ )

श्री भगवानुवाच—

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥

गीता, अ० १५, श्लो० १

यस्मात् मदधीनं कर्मिणां कर्मफलं ज्ञानिनां च ज्ञानफलं, अतो भक्तियोगेन मां ये सेवन्ते ते मत्प्रसादाज्ज्ञानप्राप्तिक्रमेण गुणातीता मोक्षं गच्छन्ति। किमु वक्तव्यमात्मनस्तत्त्वमेव सम्यग्विजानन्त इत्यतो भगवान् अर्जुनेनापृष्टोऽपि आत्मनस्तत्त्वं विवक्षुरुवाच। ऊर्ध्वमूलमित्यादिना तत्र तावद्वृक्षरूपककल्पनया वैराग्यहेतोः संसारस्वरूपं वर्णयति। विरक्तस्य हि संसाराद्भगवत्तत्त्वज्ञानेऽधिकारो नान्यस्येति—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

( शाङ्करभाष्यम् ) ऊर्ध्वमूलमिति । ऊर्ध्वमूलं कालतः सूक्ष्मत्वात्कारणत्वान्नित्यत्वान्महत्त्वाच्चोर्ध्वम्, उच्यते ब्रह्म अव्यक्तं मायाशक्तिमत्, तन्मूलमस्येति सोऽयं संसारवृक्ष ऊर्ध्वमूलः । श्रुतेश्च—"ऊर्ध्वमूलोऽवाक्शाखः एपोऽश्वत्थः सनातनः" [ कठ ६, १ ] इति । पुराणे च—

"अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोच्छ्रितः ।
बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः ॥
महाभूतविशाखश्च विपयैः पत्रवांस्तथा ।
धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः ॥
आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः ।
एतद्ब्रह्मवनं चैव ब्रह्मा चरति नित्यशः ॥
एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना ।
ततश्चात्मरतिं प्राप्य तस्मान्नावर्तते पुनः ।"

[ मभा० अश्व० ४७, १२, १५ ] इत्यादि । तमूर्ध्वमूलं संसारं मायामयं वृक्षमधःशाखं महदहङ्कारतन्मात्रादयः शाखा इवास्याधो भवन्तीति सोऽयमधःशाखस्तमधःशाखं, न श्वोऽपि स्थाता इत्यश्वत्थस्तं क्षणप्रध्वंसिनमश्वत्थं प्राहुः कथयन्ति अव्ययं संसारमायायाः अनादिकालप्रवृत्तत्वात्सोऽयं संसारवृक्षोऽव्ययो अनाद्यनन्त देहादिसंतानाश्रयो हि सुप्रसिद्धः, तमव्ययम् । तस्यैव संसारवृक्षस्येदमन्यद्विशेपणं छन्दांसि यस्य पर्णानि छादनात् ऋग्यजुःसामलक्षणानि यस्य संसारवृक्षस्य पर्णानीव पर्णानि । यथा वृक्षस्य

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

परिरक्षणार्थानि पर्णानि, तथा वेदाः संसारवृक्षपरिरक्षणार्थाः, धर्माधर्मतद्धेतुफलप्रदर्शनार्थत्वात् । यथा व्याख्यातं संसारवृक्षं समूलं यस्तं वेद स वेदवित् वेदार्थविदित्यर्थः । नहि समूलात् संसारवृक्षादस्माज्ज्ञेयोऽन्योऽणुमात्रोऽप्यवशिष्टोऽस्त्यतः सर्वज्ञः सर्ववेदार्थविदिति समूलसंसारवृक्षज्ञानं स्तौति ॥ १ ॥

पूर्वाध्यायान्ते 'मां च योऽव्यभिचारेण भक्तियोगेन सेवते' इत्यादिना परमेश्वरमेकान्तभक्त्या भजतस्तत्प्रसादलब्धज्ञानेन ब्रह्मभावो भवतीत्युक्तम्, नचैकान्तभक्तिर्ज्ञानं वाऽविरक्तस्य संभवतीति वैराग्यपूर्वकं ज्ञानमुपदेष्टुकामः प्रथमं तावत्सार्धश्लोकाभ्यां संसारस्वरूपं वृक्षरूपकालङ्कारेण वर्णयन्—

( श्रीधरीव्याख्या ) ऊर्ध्वमूलमिति । ऊर्ध्वमुत्तमक्षराक्षराभ्यामुत्कृष्टः पुरुषोत्तमो मूलं यस्य तम् । अध इति ततोऽर्वाचीनाः कार्योपाधयो हिरण्यगर्भादयो गृह्यन्ते । ते तु शाखा इव शाखा यस्य तम् । विनश्वरत्वेन श्वः प्रभातपर्यन्तमपि न स्थास्यतीति विश्वासानर्हत्वादश्वत्थं प्राहुः । प्रवाहरूपेणाविच्छेदादव्ययं च प्राहुः । 'ऊर्ध्वमूलोऽर्वाक्शाखः एषोऽश्वत्थः सनातनः' इत्याद्याः श्रुतयः । छन्दांसि वेदाः यस्य पर्णानि धर्माधर्मप्रतिपादनद्वारेण छायास्थानीयैः कर्मफलैः संसारवृक्षस्य सर्वजीवाश्रयणीयत्वापादनात्पर्णस्थानीया वेदाः । यस्तमेवंभूतमश्वत्थं वेद स एव वेदार्थवित् । संसारवृक्षस्य मूलमीश्वरः श्रीनारायणः । ब्रह्मादयस्तदंशाः शाखास्थानीयाः । स च संसारवृक्षो विनश्वरः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रवाहरूपेण नित्यश्च । वेदोक्तैः कर्मभिः सेव्यतामापादित-श्चेत्येतावानेव हि वेदार्थः । अतएव विद्वान् वेदवित् इति स्तूयते ।

( भावार्थबोधिनी ) ऊर्ध्वमूलमिति—संसारवृक्षका दृष्टान्त सब शरीरोंमें समझना चाहिये । शरीरमें ऊर्ध्वमूल शिर है । और शाखा पाद है। पूर्वका कर्म अश्वत्थरूप अव्यय है। कर्मोंसे प्राणोंका छन्द (व्यापार) होता है। वह जैसा वेदमें है वैसा ही फल भोगता है ।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

# ❀ शारीरक मीमांसा ❀

शारीरक मीमांसा शरीरमें ज्ञानेन्द्रियोंसे देखता है, कर्मेन्द्रियोंसे क्रिया करता है और मनसे उसे बनाता है; क्योंकि आकाश, शब्द और रूप इन तीन गुणोंका नाम ब्रह्म है। (पञ्चतत्त्व) शब्दरूप है और रूप से ६ रस बनते हैं। रस रूप और रंग के भेद से ७ बनते हैं। ६ रस + ७ रूप + ५ तत्त्व ये मिलकर १८ तत्त्व हुए, यही १८ ब्रह्मके सूत्र हैं। आत्मा, पुरुष और जीव ये तीनों शरीरमें रहते हैं। त्रिविध ज्ञानेन्द्रियोंके व्यापारसे मुक्ति होती है। और त्रिविध कर्मेन्द्रियोंके त्यागसे पुनः शरीर बनता है और दूसरा शरीर प्राप्त होता है। १८ के साथ इन ६ व्यापारोंका सम्बन्ध होनेसे २४ तत्त्व होते हैं। इनका व्यक्तमें भोग होता है और कर्मेन्द्रियोंके त्यागसे अव्यक्तमें रहता है। इन्हीं ६ सम्बन्धोंके द्वारा ज्ञानेन्द्रिय और कर्मेन्द्रियों से कर्मफल का भोग होता है। और क्रिया कर्मके दूसरे शरीरमें जाती है। यही कर्मकी उत्पत्ति और त्यागसे मोक्ष और बन्ध होता है। यही शारीरक मीमांसा है।

ब्रह्मसूत्रके ४ अध्याय हैं। इसके प्रत्येक अध्यायमें चार चार पाद हैं। वही प्रत्येक पादके आदिके सूत्र ये १६ सूत्र हैं। ब्रह्म संसारका आधाररूप है। भेदसे अपने अपने अङ्कुर के स्वरूपका नाम जगत् (शरीर) है। वही अङ्कुर सूत्ररूप है। भूतकालका नाम उस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अङ्कुरमें है। और भविष्यमें वही वृक्ष है, वही फल और बीज है। फिर अङ्कुर होता है—यही 'बीजाङ्कुर' न्याय है। क्योंकि बीजसे अङ्कुर और अङ्कुरस्वरूप वृक्षसे फूल, फल, बीज होते हैं।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

# ब्रह्मसूत्र के १६ सूत्र

| | | |
|---|---|---|
| १ अथातो ब्रह्मजिज्ञासा | [ प्रथमाध्याये प्रथमपादः ] |
| २ सर्वत्र प्रसिद्धोपदेशात् | [ ,, द्वितीयपादः ] |
| ३ द्युभ्वाद्यायतनं स्वशब्दात् | [ ,, तृतीयपादः ] |
| ४ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च । | [ ,, चतुर्थपादः ] |
| ५ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् । | [द्वितीयाध्या० प्रथमपादः] |
| ६ रचनानुपपत्तेश्च नानुमानम् | [ ,, द्वि० पा० ] |
| ७ न वियदश्रुतेः | [ ,, तृ० पा० ] |
| ८ तथा प्राणाः | [ ,, च० पा० ] |
| ९ तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् | [तृतीयाध्याये प्रथमपादः ] |
| १० सन्ध्ये सृष्टिराह हि | [ ,, द्वि० पादः ] |
| ११ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् | [ तृ० तृ० पा० ] |
| १२ पुरुषार्थोऽतः शब्दादिति बादरायणः | [ तृ० च० पा० ] |
| १३ आवृत्तिरसकृदुपदेशात् | [ चतुर्थाध्या० प्र० पा० ] |
| १४ वाङ्मनसि दर्शनाच्छब्दाच्च | [ च० अ० द्वितीयपादः ] |

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१५ अर्चिरादिना तत्प्रथितेः [ च० अ० तृतीयपादः ]
१६ सम्पद्याविर्भावः स्वेन शब्दात् [ च० अ० चतुर्थपादः ]

## १६ ब्रह्मसूत्रोंकी व्याख्या

जबतक वेदान्तदर्शनके आद्योपान्त विषयोंका ज्ञान नहीं होगा, तबतक उसका रहस्य भी पाठकोंके हृदयङ्गम न होगा। एतदर्थ यदि सम्पूर्ण ब्रह्मसूत्रोंका पर्यालोचन किया जाय तब भी वह बहुत बड़ा होनेसे सुगमताके साथ थोड़े समयमें पढ़ा नहीं जा सकता। अतः संक्षेपमें पर्याप्त ज्ञानके लिए ब्रह्मसूत्रके ४ अध्यायके १६ पादोंके प्रथम १६ सूत्रोंकी यहाँ संक्षिप्तरूपसे व्याख्या की गई है। आशा है कि जिज्ञासुओंको इससे 'स्थालीपुलाक' न्यायसे ब्रह्मदर्शनका पर्याप्त विषयका ज्ञान हो जायगा।

### १—अथातो ब्रह्मजिज्ञासा।

( अध्याय १ पाद १ सूत्र १ )

अथ = अनन्तर = नित्यानित्यवस्तुविवेक, ऐहलौकिकपारलौकिकभोगविराग, शमादिसाधनसम्पत् (शम, दम, उपरति, तितिक्षा, समाधान, श्रद्धा), मुमुक्षुत्व इन साधनचतुष्टयोंके प्राप्त्यनन्तर।

अतः अग्निहोत्रादिकर्मके अनित्यफलक होनेके कारण—

ब्रह्मजिज्ञासा—ब्रह्मके जानने की इच्छा होती है।

### २—सर्वत्र प्रसिद्धोपदेशात्।

( अ० १ पा० २ सू० १ )

मनोमयत्वादि धर्मोंसे ब्रह्महीं उपासनीय है, जीव नहीं। क्योंकि सर्वत्र सम्पूर्ण वेदान्तवाक्योंमें ब्रह्मशब्दका आलम्बन जगत्कारण ब्रह्म ही प्रसिद्ध है। और श्रुतियोंसे भी ब्रह्महीका उपदेश है।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

## ३—द्युभ्वाद्यायतनं स्वशब्दात् ।

(अ० १ पा० ३ सू० १)

'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतम्' इस मन्त्रमें द्युभ्वादि-स्वर्लोक तथा पृथिवी आदिका आयतन ( आधार ) जो सुना जाता है वह ब्रह्म ही है। वायु या प्रधान प्रकृति नहीं है क्योंकि—'तमेवैकं जानथ आत्मानम्' इस श्रुतिमें आत्म शब्दहीका ग्रहण है, वाय्वादिका नहीं ।

## ४—आनुमानिकमप्येकेषामिति चेन्न शरीररूपक-विन्यस्तगृहीतेर्दर्शयति च ।

(अ० १ पा० ४ सू० १)

"जन्माद्यस्य यतः" इस सूत्रसे इस प्रपञ्चका जिससे उत्पत्ति हो, जिसमें स्थिति हो और जिसमें लय हो वही ब्रह्म है, यह ब्रह्मका लक्षण कह आये हैं, परन्तु यह लक्षण तो कपिलादिसम्मत प्रकृति अजामें भी है । इस दोषका निराकरण वेदसम्मत प्रधानकी कारणता नहीं है यह पूर्वमें दिखला आये हैं । परन्तु यह ठीक नहीं है, क्योंकि कठोपनिषत्के 'महतः परमव्यक्तमव्यक्तात्पुरुषः' इस वचनसे प्रधानकी कारणता सिद्ध होती है। यही बात 'आनुमानिकमप्येकेषाम्' कपिलादिकोंके मतसे अनुमानसिद्ध जो प्रधानका कारणत्व है वह श्रुति-स्मृति-शब्दप्रमाणसिद्ध भी है। यह कहकर खण्डन करते हैं कि यह कठका वचन लोकसिद्धार्थप्रतिपादक है, अपूर्व नहीं । क्योंकि रूपकालङ्कारसे विन्यस्त शरीरका ही अव्यक्त शब्दसे काठक वचनोंमें ग्रहण किया है । यथा—

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इन्द्रियाणि हयानाहुः विषयाँस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥

इस रूपकके बादहीका यह वचन है—

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्नपरं किञ्चित्सा काष्ठा सा परागतिः ॥

यहाँ पूर्वोक्तरूपकमें कहे गये ही इन्द्रियादि ही उपक्रमवश लिये गये हैं। अतः अव्यक्तशब्देन परिशिष्यमाण शरीर है, प्रधान नहीं।

प्रथम अध्यायमें ब्रह्म जगदुत्पत्तिका कारण है, जैसे मृत्सुवर्णादि घट कुण्डलादिका । उत्पन्न जगत्का नियन्ता होनेसे स्थितिका कारण भी वही है, जैसे ऐन्द्रजालिक—इन्द्रजालका फले हुए जगत् उसीमें लय होनेसे संसारका भी वही कारण है, जैसे पृथिवी पार्थिव प्रपञ्चका यह बात दिखला चुके। अब द्वितीय अध्याय में ब्रह्मको जगत् कारण माननेसे अन्य सिद्धान्तावलम्बियोंको स्मृतिन्यायका विरोध प्रतीत होता है, उसका निराकरण तथा प्रधानवादियोंका न्यायाभासोपबृंहण इत्यादि कहेंगे । प्रथमस्मृतिविरोधपरिहारके लिए यह प्रथम सूत्र है ।

### ६—स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्य-स्मृत्यनवकाशदोषप्रसङ्गात् ।

(अ० २ पा० १ सू० १)

“ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्” (श्वे० ५।२) इस वचनके अनुसार कपिलका मत अयथार्थ नहीं

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

हो सकता, अतः प्रधान को ही जगत्का कारण मानना चाहिये, ब्रह्मको नहीं, क्योंकि उक्त स्मृतिका विरोध होगा। इसी शङ्काको इस सूत्रमें उठाकर समाधान भी किया है—

स्मृत्यनवकाशदोपप्रसङ्गः—उपर्युक्त स्मृतिवाक्य अनवकाश हो जायगा, ब्रह्मको जगत् कारण माननेसे यह बात ठीक नहीं है क्योंकि अन्य स्मृतिवाक्योंका अनवकाशरूप दोप प्रसक्त होगा। यही बात इति चेन्नान्यस्मृत्यनवकाशदोपप्रसङ्गात् इस सूत्रोत्तरार्द्धसे कही गई है। यहाँ स्मृतिपदसे श्रुति स्मृति दोनोंका ग्रहण है।

यद्यपि पहले ही सांख्यादिमतका निराकरण कर दिया है, तथापि पूर्वमें केवल शब्दप्रमाणमात्रसे मतान्तरका निराकरण किया गया है। अब युक्तियोंसे भी वेदान्तमतका स्थापन तथा मतान्तरका निरसन ही इस पादका विपय है, वही युक्ति इस सूत्र से दिखलाते हैं।

## ६—रचनानुपपत्तेश्च नानुमानम्।

(अ० २ पा० २ सू० १)

प्रधानवादि कहते हैं, कि घट शराव इत्यादि वस्तु जैसे मृदात्मक वस्तुसे अनुस्यूत है, उसी प्रकार सर्ववस्तु सुखदुःखमोहात्मक प्रकृतिसे अनुस्यूत है, क्योंकि प्रकृतिसे अन्वित है। इसपर ब्रह्मवादि कहते हैं कि यदि दृष्टान्तबलसे प्रधान सिद्ध करते हो तो कहीं भी अचेतन वस्तु विना चेतनके पुरुपार्थ साधक विकारजातको बनाते हुए नहीं देखा गया है। किन्तु गेह प्रासाद शय्या इत्यादि विज्ञशिल्पियोंद्वारा ही बनाये गये सुखदुःखप्राप्ति परिहारयोग्य होते हैं। उसी तरह सकल पृथिव्यादि प्रपञ्च बाह्यपदार्थ तथा आध्यात्मिक शरीरादि बड़े बुद्धिमान लोक प्रसिद्ध असंख्य शिल्पियोंसे भी नहीं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बनाये जा सकते, अचेतन प्रकृतिकी क्या गणना। अचेतनसे रचना-जगत्‌की हो नहीं सकती, अतः चैतन्यस्वरूप ब्रह्म अवश्य मानना चाहिये।

## ७—न वियदश्रुतेः।

(अ० २ पा० ३ सू० १)

जगत्‌की उत्पत्ति तथा उसके क्रमके विषयमें अनेक मत हैं। उनमें आकाशकी उत्पत्ति नहीं होती यही पूर्वपक्ष दिखलाते हुए वेदान्तियोंने ब्रह्मातिरिक्त पदार्थमात्रको जन्म तथा नश्वर माना है। वही पूर्वपक्ष लेकर यह सूत्र है "न वियदश्रुतेः" आकाशकी उत्पत्ति नहीं होती, क्योंकि उत्पत्तिबोधक कोई श्रुति नहीं है। अन्तमें उत्पत्तिबोधक श्रुतियाँ दिखलाकर उसकी उत्पत्ति सिद्ध की है।

## ८—तथा प्राणाः।

(अ० २ पा० ४ सू० १)

कुछ ऐसे वैदिक वाक्य मिलते हैं जिनसे प्राणकी अनुत्पत्ति सिद्ध होती है। कुछ ऐसे भी वचन मिलते हैं जिनसे प्राणकी उत्पत्ति सिद्ध होती है। इस विप्रतिपत्तिके हटानेके लिए यह सूत्र (तथा प्राणाः) का उपन्यास है। जैसे आत्मासे आकाशकी उत्पत्ति है, उसी प्रकार प्राणकी उत्पत्ति भी वेदवाक्योंसे उपलब्ध है।

यथा—(एतस्मादात्मनः सर्वे प्राणाः) एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। (मु० उ० २।१।३) सप्राणमसृजत् (प्र० ६।४) यहाँ तथा शब्द उत्पत्तिवाक्यस्थ लोकादिकोंका या वियदादि-का परामर्शक है।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

## १—तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ।

(अ० ३ पा० १ सू० १)

द्वितीयाध्यायमें अद्वैतसिद्धान्तमें किये हुए पूर्वपक्षियोंसे स्मृति-न्यायविरोधोंका परिहारादि विषय कहकर जीवव्यतिरिक्त जीवोपकरणीभूत तत्वोंकी ब्रह्मसे उत्पत्ति बतलायी गयी है ।

अब तृतीयाध्यायमें उपकरणोपहितजीवका संसरणप्रकार ब्रह्मका कालत्रयाबाधितत्वादि अनेक विषयोंका वर्णन किया गया है । उनमें प्रथमपादमें पञ्चाग्निविद्याको लेकर संसारगतिभेद दिखलाया गया है । जीव प्राण, इन्द्रियाँ तथा मनके साथ अविद्याकर्म, पूर्वप्रज्ञा ( जन्मान्तरसंस्कार ) परिग्रहपूर्वक पूर्वदेहको छोड़कर देहान्तर को प्राप्त करता है । अब इसमें यह शङ्का होती है कि क्या जीव इस देहको छोड़कर देहान्तरका बीज सूक्ष्म भूतोंके सहित जाता है या सूक्ष्म भूतसे रहित होकर जाता है । स एतास्तेजो मात्राः समभ्याददानः ( बृ० ४।४।१ ) इस वचनसे तेजोमात्र ( करणों ) का उपादान प्रतीत होता है । भूत सूक्ष्मका उपादान किसी मन्त्रसे सिद्ध नहीं होता, इस पूर्वपक्षके उत्तरमें यह सूत्र है—'तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्' । तदन्तरप्रतिपत्तौ—देहान्तरप्राप्तिमें देह बीजभूत सूक्ष्म भूतोंसे परिष्वक्त होकर जीव इस शरीरसे जाता है, क्योंकि वेदोंमें एतद्विषयक प्रश्नोत्तरसे यही प्रतीत होता है । यथा—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

## प्रश्न—"वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति"।

प्रवाहणराजाने श्वेतकेतुसे पूछा कि आप जानते हैं किं सायं प्रातर् अग्निहोत्रमें दी हुई आहुतियोंमें पाँचवीं आहुति पुरुष वन जाती है। उनके उत्तर न देनेपर उनके पितासे पूछा। पिताने उत्तर दिया कि वे आहुतियाँ श्रद्धापूर्वक देनेसे श्रद्धा नामकी सूक्ष्म जलरूप होकर द्युलोकमें जाकर सोम चन्द्रमा वन जाती हैं। फिर चन्द्रमाद्वारा पर्जन्याग्निमें हुत होकर वृष्टिरूपमें परिणत हो जाती है। फिर पृथिवीमें हुत होकर अन्न वन जाती है। तदनन्तर पुरुषमें हुत होकर रेतः (वीर्य) वन जाती है। फिर योषित् (स्त्री) में पाँचवें वार हुत होनेपर आप (जल) होकर पुरुष वन जाती है। इससे स्पष्ट हो गया कि जीव सूक्ष्मभूत (जल) से परिवेष्टित होकर देहान्तरप्राप्तिके लिए जाता है।

## १०—सन्ध्ये सृष्टिराह हि।

(अ० ३ पाद० २ सू० १)

पूर्वपादमें जीवका संसारगतिभेद कहकर अव इस द्वितीय पादमें उसकी अवस्थाविशेष आदिका वर्णन करेंगे। जीवकी स्वप्नावस्थाको लेकर 'स यत्र प्रस्वपिति' वृ० (४।३।९) इस श्रुतिके उपक्रममें "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान्पथः सृजते" यह श्रुति कही गई है। इस पूर्वपक्षप्रदर्शक श्रुतिसे सिद्ध होता है कि स्वप्नावस्थाकी सृष्टि सत्य है। इसी पूर्वपक्षका समर्थक "सन्ध्ये सृष्टिराह हि" यह सूत्र है। सन्ध्ये—स्वप्नस्थानमें—सृष्टिः रथादिनिर्माण सत्य है। फिर उत्तरपक्षमें ३ सूत्रसे कहा है कि

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

स्वप्नमें माया अनादिवासनामात्रसे रथादिकी प्रतीतिमात्र है। क्योंकि वहाँ रथादिनिर्माणका देह देशमें स्थान नहीं, सामग्री नहीं, कैसे वास्तविक रथादिकी रचना क्षणमात्रमें हो सकती है। अतः वह सृष्टि असत्य है। यह सब वर्णन वैराग्यरूप साधनकी सिद्धि-के लिए किया गया है।

पूर्वपादमें तत्-त्वं पदार्थका निरूपणपूर्वक ब्रह्मविचार हो गया। अब इस तृतीय पादमें प्रतिवेदान्त अर्थात् भिन्न भिन्न उपनिषदोंमें भिन्न भिन्न ब्रह्मज्ञान वर्णित हैं उसीका विचार इस पादमें करेंगे। क्या वेदान्तभेदसे ब्रह्मविज्ञानका भेद है या नहीं ? इसपर पूर्वपक्षरूप में विज्ञानका तैत्तिरीयक, वाजसनेयक, कौथुमक इत्यादि नामभेद, रूपभेद जैसे कोई पञ्चाग्निविद्यामें छठवाँ अग्नि भी मानते हैं, और कोई पाँच ही मानते हैं। एवं कर्मभेद भी मिलते हैं। इस तरह प्रतिवेदान्त विज्ञानभेद बतला कर सिद्धान्त किया है कि—

## ११—"सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्"।

(अ० ३ पा० ३ सू० १)

सब वेदान्तोंमें प्रत्यय-विज्ञान एक ही है। जैसे अग्निहोत्रमें शाखाभेद होनेपर भी पुरुषप्रयत्न एकसा ही रहता है, उसी प्रकार नामभेदसे विज्ञानभेद यद्यपि प्रतीत होता है तथापि उसका स्वरूप एक ही है। इसी तरह पञ्चाग्निविद्या, वैश्वानरविद्या, शाण्डिल्य-विद्याओंमें भी ऐक्य ही है।

भेदका प्रयोजक चोदनाभेद ही होता है। यहाँ प्रतिवेदान्तमें चोदना एक ही है। यही उपर्युक्त सूत्रमें कहा गया है। "चोदना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अविशेषात्" इति । चोदना पुरुषप्रयत्नः पुरुषके व्यापार ही यहाँ चोदना शब्दसे विवक्षित हैं । वह सब शाखाओंमें एक ही है ।

पूर्वपादमें परापरविद्याका स्वरूपनिरूपण हो चुका । अब वे विद्याएँ कर्माङ्ग होकर पुरुषार्थ ( मोक्ष ) का साधक है या स्वतन्त्र रूपसे इस सन्देहको दूर करनेके लिए यह सूत्र है ।

### १२—पुरुषार्थोऽतः शब्दादिति बादरायणः ।

(अ० ३ पा० ४ सू० १)

अतः वेदान्तविहित आत्मज्ञानसे स्वातन्त्र्येण मोक्षकी सिद्धि होती है, कर्माङ्गतया नहीं । "शब्दात्" तरति शोकमात्मवित् ( छा. ७।१।३ ) ब्रह्मविदाप्नोति परम् ( तै० २।१।१ ) इत्यादि श्रुतियोंसे ब्रह्मज्ञानकी साक्षात् मोक्षसाधकता सिद्ध होती है । यह बादरायण ( व्यासजी ) का मत है ।

तृतीयाध्यायमें परापरविद्याका साक्षान्मोक्ष साधकता है, या कर्माङ्गतया है, इस विचारके अनन्तर ४ अध्यायमें फलका निरूपण करेंगे ।

प्रथम श्रवण, मनन, निदिध्यासनादि साधनोंका फलसिद्धिके लिए बार बार अनुसरण करना चाहिये, या एक बार ही इस संशयके निराकरणके लिए यह सूत्र है ।

### १३—आवृत्तिरसकृदुपदेशात् ।

( अ० ४ पा० १ सू० १ )

"श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" एतद्वचनविहितश्रवणादिका बार बार अवलम्बन करना चाहिये । क्योंकि वेदमें कई बार श्रवणादि विधायक वाक्यकी आवृत्ति देख पड़ती है । अतः श्रवणादिकी आवृत्तिमें ही उसका तात्पर्य है । श्रवणादिका ब्रह्मदर्शन ही

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

फल है, अतः जबतक ब्रह्मदर्शन न हो तबतक श्रवणादिकी आवृत्ति करनी चाहिये। यही इस सूत्रका तात्पर्य है।

## १४—वाङ्मनसि दर्शनाच्छब्दाच्च ।

(अ० ४ पा० २ सू० १)

इस पादमें विद्या द्वारा फलप्राप्तिके लिए देवयानपथका वर्णन करेंगे। इसके पहले उत्क्रान्ति ( मरण ) का कुछ विचार करते हैं। विद्वान् हो या अविद्वान् हो सबका मरणक्रम एकसा होता है यह आगे कहेंगे। ( अस्य सौम्यपुरुषस्य प्रयतो ( म्रियमाणस्य ) वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ) क्या वागिन्द्रियका मनमें लय होता है या वागिन्द्रियके व्यापारका मनमें लय होता है ? इसी सन्देहपर इस "वाङ्मनसि दर्शनाच्छब्दाच्च" सूत्रसे वाग्वृत्ति (व्यापार) का मनमें लय होता है, वागिन्द्रियका नहीं। 'दर्शनात्' मरण समयमें देखा गया है कि मनोवृत्ति रहते हुए भी वाग् बन्द हो जाती है। 'शब्दाच्च' कारणमें ही कार्यका लय वेदप्रमाणादिसे सिद्ध है। अतः वाग्वृत्ति ( वाग्व्यापार ) का ही लय मनमें अध्यारोपित है, क्योंकि मनके अधीन ही इन्द्रियोंकी वृत्तियाँ हैं।

मरणानन्तर जानेके लिए "अथैतैरेव रश्मिभिरूर्ध्व आक्रमते, तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहः, स एतं देवयानं पन्थानमासाद्या-ग्निलोकमागच्छति, यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति, सूर्यद्वारेण ते विरजाः प्रयान्ति" इन श्रुतियोंसे नानामार्ग सुने जाते हैं। परन्तु एक ही सृति ( मार्ग ) अनेक विशेषणोपलक्षित रूपसे ब्रह्मलोकप्रापिका होती है। यही इस—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

## १५—अर्चिरादिना तत्प्रथितेः ।

(अ० ४ पा० ३ सू० १)

सूत्रसे उपलब्ध होता है। ब्रह्मोपासकोंके अर्चिरादि मार्गसे ही सम्पूर्ण ब्रह्मेप्सु कार्य ब्रह्मलोकको जाते हैं। उन्हीं अर्चिरादिमार्गोंका अनेक रूपसे अनेकत्र वर्णन है। "तत्प्रथितेः" क्योंकि उसी मार्गकी सर्वत्र प्रसिद्धि है।

तृतीयपादमें सगुणविद्याफलोपयोगी गतिगन्तव्यमार्ग गमनाधिकारियोंका निरूपण हो गया। अब चतुर्थपादमें परविद्याफलभूत-ब्रह्माविर्भाव सगुणविद्याफल सर्वेश्वरतुल्यभोग इत्यादिका निरूपण होगा।

यह जीव इस शरीरसे उठकर परंज्योतिः परब्रह्मको प्राप्त होकर "स्वेन रूपेणाभिनिष्पद्यते" यहाँ स्वरूप शब्दका आत्मरूप अर्थ है, या आत्मीय आगन्तुक रूप है, आत्मरूपसे ही आविर्भूत होता है, आत्मीयागन्तुक रूपसे नहीं। क्योंकि जिस किसी रूपसे आविर्भूत होगा, वह सब आत्मीय ही रूप हो जायगा। फिर "स्वेन रूपेण" इस वाक्यमें स्वशब्दका उपादान व्यर्थ होगा। अतः स्वशब्द यहाँ आत्मीय अर्थमें नहीं है, किन्तु आत्मा अर्थमें है। यही बात—

## १६—सम्पद्याविर्भावः स्वेन शब्दात् ।

(अ० ४ पा० ४ सू० १)

इस सूत्रसे कही गयी है। सम्पद्य—परब्रह्मको प्राप्तकर स्वेन आत्मा भिन्न रूपसे आविर्भूत होता है। शब्दात् श्रुतिसे यही बात प्रमाणित होती है।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

# उपनिषद्विमर्श

सांसारिक उन्नतिकी दौड़में आर्यजाति इस समय चाहे जितनी पिछड़ गयी हो, परन्तु पारलौकिक उन्नति जो उसने अतिप्राचीन कालमें कर ली थी, उसकी समता आज भी संसारमें सभ्यताके प्रचार करनेका दमभरनेवाली जातियाँ नहीं कर सकतीं। जातिकी इस ऊर्जितावस्थाका सारा श्रेय उन वैदिक ऋषियोंको है जो अपनी अनन्तज्ञानराशिमें हमें वेदों और वेदान्तके रूपमें छोड़ गये हैं। वेदोंका निचोड़ वा शिरोभाग वेदान्त कहाता है क्योंकि कर्म शेष करता है और यह वेदान्त ब्रह्मविद्याका प्रतिपादन करता है। इस ब्रह्मविद्या या वेदान्तके मूल आधार 'उपनिषत्' नामसे प्रसिद्ध हैं। यद्यपि वेदान्तशब्दमें ब्रह्मविद्याका उपदेश करने वाले सभी विषयों-का समावेश हो सकता है, तथापि श्रीबादरायणाचार्यकृत वेदान्त वा ब्रह्मसूत्रों, उपनिषदों और श्रीमद्भगवद्गीताको ही मुख्य कर वेदान्त नामसे पुकारते हैं। इन्हें 'प्रस्थानत्रयी' भी कहते हैं। श्री-मद्भगवद्गीताकी संज्ञा भी उपनिषत् ही है। और इस वचन

"सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीताऽमृतं महत्॥"

के अनुसार गीता उपनिषदोंका सारमात्र है। ब्रह्मसूत्र स्वतन्त्र ग्रन्थ नहीं कहे जा सकते, क्योंकि ये भी उपनिषदोंके ही सारभूत हैं। उनमें विशेषता केवल उतनी ही है कि उपनिषदोंमें जहाँ कहीं मतभेदसा दिखायी दिया है, वहाँ श्रीबादरायण व्यासने एकवा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्यता सिद्ध करनेका प्रयत्न किया है। इसलिए उपनिषदोंको ही ब्रह्मविद्याका मूल मानना उचित है। वेदान्त वेदका ही अङ्ग है, केवल ब्रह्मज्ञानका उपदेश करनेके कारण वेदका अन्त या मथितार्थ अथवा निचोड़ बताया गया है। यों तो उपनिषदोंकी संख्या दो सौ बत्तीस बताई जाती है, पर इनमें अकबरके समयकी बनी "अल्लोपनिषत्" तकका समावेश हो जाता है। साधारणतया १०८ उपनिषदें मानी जाती हैं, परन्तु इनमें भी सब प्राचीनसी ज्ञात नहीं होती हैं।

मुख्य उपनिषदें १० ही हैं, क्योंकि शरीरमें १० इन्द्रियाँ ही हैं और ये सब वेदोंकी अङ्गभूत हैं। उक्त १० उपनिषदें ये हैं—ईश, केन, कठ, प्रश्न, मुण्डक, माण्डूक्य, ऐतरेय, तैत्तिरीय, छान्दोग्य और बृहदारण्यक। ऐतरेय ऋग्वेदकी, तैत्तिरीय और कठ कृष्ण यजुर्वेदकी, ईश और बृहदारण्यक शुक्लयजुर्वेदकी, केन और छान्दोग्य सामवेदकी तथा प्रश्न, मुण्डक और माण्डूक्य अथर्ववेदकी उपनिषदें हैं। ईशोपनिषत् संहिताके अन्तर्गत और शेष नवोपनिषत् ब्राह्मणोंके अन्तर्गत हैं। उपनिषत्का अर्थ है—"उपनिषद्यते = प्राप्यते ब्रह्मविद्या अनया, इत्युपनिषत्" अर्थात् जिससे ब्रह्मविद्या प्राप्त हो वह उपनिषत् है। दूसरा अर्थ यह है—"उप = नितरां सादयति—अविद्यां विनाशयतीत्युपनिषत्" अर्थात् ब्रह्मके समीप पहुँचनेके लिए अविद्यारूपी अन्धकार जो नाश करे वह उपनिषत् है। इन दोनों अर्थोंमें शब्दोंके सिवा भावमें अन्तर नहीं है।

ऊपर जिन उपनिषदोंका नामोल्लेख हुआ है उनमें ईश, केन और कठ उपनिषदों में सत्त्व, रज और तम इन तीन गुणोंका और प्रश्न, मुण्डक, माण्डूक्य, ऐतरेय और तैत्तिरीयमें पञ्चभूतों यथा

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

आकाश, वायु, अग्नि जल और पृथ्वीके सूक्ष्मातिसूक्ष्म तत्त्वोंपर विचार किया गया है। छान्दोग्यमें प्राणविद्या और आदित्यविज्ञान-का प्रधानतया विवरण है। प्रश्नोपनिषद् आदिमें आदित्यको प्राण और चन्द्रको रयि कहा गया है। अर्थात् आदित्य भोक्ता और चन्द्र भोग्य कहा गया है। पृथ्वी आदि मूर्त्तिमान् पदार्थ चन्द्ररूपभोग्य है। वायु और तेज आदित्य है। भोक्ता तीन लोकोंको उत्पन्न, पालन और संहार करता है। ये ही भोक्ता और भोग्य सांख्य-शास्त्रके पुरुष-प्रकृति बनकर विश्वका सर्जन करते हैं। प्राणरूप सूर्य प्रत्येक शरीरकी प्रत्येक इन्द्रियमें अपनी किरणों द्वारा प्रवेशकर प्रकाश और शक्ति प्रदान करता तथा उत्तर पूर्व आदि दिशाओं और ईशानादि कोणोंमें प्रवेश कर उनको प्रकाशवान् बनाता है। सूर्यही समस्त विश्वका आश्रयस्थल है, प्रकाशक है और रक्षक है, इस-लिए, उसेही विद्वानोंने विश्वरूप, जातवेदा, परायण और सहस्र-रश्मि आदि कहा है। भूः, भुवः, स्वः ये तीनों लोक सूर्यसे प्रका-शित हैं, शरीरके तीनों लोक प्राणसे प्रकाशित हैं और महः, जनः, तपः और सत्यं स्वयं प्रकाशवान् हैं। सूर्यही काल है, कालही प्रजा-पति है और प्रजापतिही संवत्सर है। यही शरीरमें समझना। संवत्सर या वर्षके दो भाग हैं। एक दक्षिणायन और दूसरा उत्त-रायण। प्रथममें सूर्य दक्षिणकी ओर, दूसरेमें उत्तरकी ओर रहता है। श्रौतस्मार्त्तकर्मकरनेवाले और इष्टापूर्त आदि यज्ञ करनेवाले पुरुष चन्द्रमाको प्राप्त करते और दक्षिणायनमार्गसे जाते हैं। इसीका नाम पितृमार्ग भी है। तपस्वी, ब्रह्मचारी, वेदगुरुभक्त और सूर्यो-पासक पुरुष सूर्यलोकको प्राप्त करते और उनकी गति उत्तरायण मार्गसे है। चन्द्रलोक या स्वर्गलोकके जीवका पुनरागमन होता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

है। परन्तु सूर्यलोकप्राप्त जीवका पुनरागमन नहीं होता। मासमें जो दो पक्ष हैं, उनमें कृष्णपक्ष चन्द्रमा है और शुक्लपक्ष सूर्य है। कृष्णपक्ष रयि और शुक्लपक्ष प्राण है। विद्वान् लोग प्राणरूप सूर्यकी ही उपासना करते हैं। फलतः प्राणही जगत्का एकमात्र आश्रय-स्थल है। इसलिए छान्दोग्योपनिषद्ने प्रधानतया प्राणविद्याकी ही विवेचना की है।

गायत्री, त्रिष्टुप्, उष्णिक्, बृहती आदि छन्दोंमें वेदमन्त्रोंके निबद्ध होनेसे वेदोंको छन्दस् भी कहते हैं। और वेदोंके गाने वालोंका नाम छन्दोग है, तथा छन्दोगोंका धर्मसम्बन्धी जो शास्त्र है उसका नाम छान्दोग्य है। यद्यपि छान्दोग्यशब्दका उपर्युक्त अर्थ है, किन्तु आजकल केवल सामवेदियोंमें ही छन्दोग शब्द रूढिसा हो गया है। इसलिए सामगही छन्दोग और यह उपनिषन् ही छान्दोग्य कही जाती है। यह उपनिषन् सामवेदके सुप्रसिद्ध "ताण्ड्य" ब्राह्मणसे निकली है। जैसा इस श्लोकसे सिद्ध होता है—

छान्दोग्योपनिषच्छ्रेष्ठा ताण्ड्यब्राह्मणनिःसृता।
अष्टौ प्रपाठकाः खण्डाः समुद्रभूतभृयुताः॥

अर्थात् उपनिषदोंमें श्रेष्ठ छान्दोग्योपनिषन् ताण्ड्यब्राह्मणसे निकली है। इसमें आठ प्रपाठक या अध्याय और १५४ खण्ड हैं।

उपनिषदोंमें चार विषयोंका विशेष विवेचन है—आत्म-व्यापकता, देहान्तरग्रहण, सृष्टितत्त्व और लयरहस्य। किन्तु ब्रह्म-विद्याके उपदेशसे ये चारों ओतप्रोत हैं। एक प्रकारसे ब्रह्मात्मैक्य-मूल है। और ये चारों विषय उसकी शाखाएँ हैं। "सत्यं ज्ञान-मनन्तं ब्रह्म" "अहं ब्रह्मास्मि" "एकमेवाद्वितीयम्" "सर्वं खल्विदं ब्रह्म" आदि महावाक्योंको छोड़ भी दिया जाय तोभी उपनिषदोंमें

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

कदाचित् ही कोई ऐसा प्रपाठक, खण्ड वा अनुवाक मिलेगा जिसमें परब्रह्मकी महिमाका आभास न मिलता हो। इसीसे उपनिषद्का एक नाम "ब्रह्मविद्या" भी है। और उपनिषदोंको ही वेदान्त कहते हैं।

उपनिषदोंकी महत्ताका अनुमान तभी लग सकता है जब सभ्य संसारकी भाषाओंका ज्ञान हो और मनुष्य यह जाने कि वे कहाँ किस रूपमें विराज रही हैं। शाहजहाँके बेटे दाराने इन उपनिषदोंका फारसीमें उल्था कराया था। पहले भी उल्थे फारसीमें हो चुके थे जिनके आधार पर मौलाना रूमने अपनी मस्नवी रची थी, जो तसव्वुफ वा सूफी सम्प्रदायका प्रसिद्ध ग्रन्थ फारसी भाषामें समझा जाता है। तसव्वुफ और कुछ नहीं हमारा वेदान्तही है। फारसीसे ग्रीक और लैटिन भाषाओं द्वारा उपनिषदोंका ज्ञान यूरोप पहुँचा और यह प्रसिद्ध है कि जर्मनी के प्रख्यात प्रोफेसर शोपनेहर इन उपनिषदोंका अध्ययनकर ऐसे मुग्ध हुए कि उन्होंने यहाँतक कह डाला कि यह ( उपनिषत् ) मुझे जीवनकालमें सान्त्वना देती रही है, और मरने पर भी सांत्वना देगी। इससे सिद्ध है कि आर्य-जातिका मस्तक संसारमें ऊँचा रखनेमें वेद सदा समर्थ रहेंगे।

## छन्द क्या है ?

शरीर द्वारा जिससे रचना होती है उसको छन्द कहते हैं। और मैं मैं (अहंभाव) से उसे समझा जाता है। शब्द, कर (पाणि) उपस्थ आदिसे रचना होती है। श्रोत्र, चक्षु और जिह्वा आदिसे समझा जाता है। व्याकरणसे ये कर्मेन्द्रिय तथा ज्ञानेन्द्रिय कहे जाते हैं। अतएव 'अभिप्रायश्छन्द आशयः' यह कोश भी संगत होता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

है। और पिङ्गलकी मात्रावृत्ति तथा वर्णवृत्ति ये दो वृत्तियाँ हैं, अतः व्याकरण तथा पिङ्गल ये दोनों छन्दःस्वरूप हैं—अर्थात् छन्दःप्रतिपादक हैं, क्योंकि व्याकरणसे शब्दका ग्रहण और त्याग होता है। पिङ्गलसे भावद्वारा मात्राका ग्रहण और त्याग होता है तथा मनद्वारा अक्षरका त्याग और ग्रहण होता है। इसी प्रकार वृक्षमें भी छन्दका स्वरूप समझना चाहिये। वृक्ष पत्र, फूल एवं वीजस्वरूप है। ब्रह्मसे संसारवृक्ष होता है और भेदसे जगत् (शरीराङ्कुर) वृक्ष भासता है, यही छन्दः है।

## त्रयी विद्या

१—हृदयमें रहनेवाला मन वेद है। और फलमें वीज वेद है। वीजका भेद अपने अपने स्वरूप और स्वभावके अनुकूल अङ्कुर उत्पन्न करता है।

२—ब्रह्मसूत्रको वीजाङ्कुरके तरह समझना चाहिये। जैसा अङ्कुरका भेद होता है, वैसाही शरीर और वृक्ष बनता है, वृक्षके अनुरूप फल लगता है और फलमें वीज रहता है। यही भेदसे अनेक है। और शब्दसे एक है। ब्रह्म शब्दरूप है। संसार शब्दका अर्थ रूप है, क्योंकि मुखसे एक शब्द बोला जाता है और सहस्रों उसे सुनते हैं। पूर्वके कर्मसे शरीरका भेद होता है, जैसे आयु एक है और आयुमें फल प्रतिदिन अलग अलग भोगा जाता है। यह बात जड़ और चेतनमें समान है। छन्द शब्द और रूपका बनता है। इसको लोग सुनते, देखते और समझते हैं। इन्हीं तीनों को "त्रयीविद्या" कहते हैं।

(राजा) बलदेवदास बिरला

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

# चतुर्दशसूत्रोंकी दार्शनिक व्याख्या

नत्वा शब्दात्मकं ब्रह्म नन्दिकेश्वरकाशिकाम् ।
समाश्रित्य च व्याचष्टे सूत्रं वेदेन्दुसंख्यकम् ॥

बहुतसे महर्षि स्वाभिमतसिद्धिके निमित्त तप कर रहे थे। महेश्वरने वागगोचर ब्रह्मतत्त्वको बतलाते हुए अपने डमरूके नादसे ऋषियोंके अभिमत पदार्थका उपदेश किया। तदनन्तर चतुर्दश-सूत्रात्मक नादका रहस्य जब ऋषियोंको समझ न आया तो वे सब लोग नन्दिकेश्वरके समीप उन सूत्रोंका रहस्य समझनेके लिए आये। उनके पूछने पर नन्दिकेश्वरने 'नृत्तावसाने' इत्यादि २७ सत्ताईस कारिकाओंसे इन १४ सूत्रोंका रहस्य बतलाया। वे कारिकाएँ तथा उनकी हिन्दी व्याख्या यहाँ प्रदर्शित की गई है।

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ १ ॥

अर्थ—विश्वप्रपञ्चका नानाविध सृष्टि-स्थिति-प्रलयरूप विचित्र नाट्यप्रदर्शनवाले अतएव नटराजराज महादेवने नर्तनके अन्तमें १४ बार डमरूको सनकादिसिद्धोंके उद्धारकी इच्छासे बजाया। यह नाद मैं समझता हूँ कि अकारादि वर्णात्मक अतिरहस्यभूत शिवजीका सूत्रसमुदाय या कल्याणरूप सूत्रसमूह है।

अत्र सर्वत्र सूत्रेषु अन्त्यवर्णश्चतुर्दश ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥ २ ॥

इन सब सूत्रोंमें अन्तिम १४ (इत्संज्ञक) वर्णोंका पाणिन्यादि मुनिके धातुमूलक शब्दशास्त्रमें प्रत्याहारद्वारा प्रवृत्तिके लिए शिव-



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जीने उपदेश किया है। यह अन्य ऋषियोंके अन्य अभीष्टोंका भी उपलक्षण है।

अइउण् ॥ १ ॥

अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु।
चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः ॥ ३ ॥

निर्गुणब्रह्मस्वरूप ही अकार है। इसीलिए गीतामें कहा है—'अक्षराणामकारोऽस्मि' इति। वह इ—मायाको समाश्रयण कर सर्ववस्तुओंमें उ—व्यापक सगुण ईश्वर जगद्रूपसे ण्—आसीत्—आविर्भूत हुआ। सृष्टिकालमें अ—इ—उ—ऋ—ऌ इन पाँच वर्णोंसे ही उनचास अक्षरों, पञ्चभूतों तथा पञ्चवर्गोंकी उत्पत्ति हुई। तथा च श्रुतिः 'असद्वा इदमग्र आसीत् ततो वै सदजायत' सृष्टिके पूर्व असत्—इस समय असत् रूपसे प्रतीतसा हो रहा अकाररूप ब्रह्म ही था। उसीसे सत्-सद्रूपसे प्रतीयमान अर्थात् सगुण होकर आविर्भूत हुआ।

अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः।
आद्यमन्त्येन संयोगादहमित्येव जायते ॥ ४ ॥

अर्थ—सब वर्णोंमें अग्रगण्य अकार प्रकाशस्वरूप परमात्मा ही है। परमात्मासे आविर्भूत अकारादि हकारान्तवर्णसमुदायका आद्यन्त अकार हकारके सम्बन्ध होनेसे 'अहम्' बन जाता है। इससे यह भी उपलब्ध हुआ कि 'एकोऽहं द्वितीयः स्याम्' इस श्रुतिसे बोधित अहम् पदवाच्य ही जीव भी है।

सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत्।
ज्ञप्तेर्बभूव पश्यन्ती मध्यमा वाक् ततः स्मृता ॥ ५ ॥

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

वक्त्रे विशुद्धचक्राख्ये वैखरी सा मता ततः ।
सृष्ट्याविर्भावमासाद्य मध्यमा वाक् समा मता ॥ ६ ॥

अर्थ—यह सम्पूर्ण जगत् पहले ज्ञप्तिमात्र–ब्रह्मस्वरूप ही था। फिर वही परमात्मा अनादिजीवोपाधिभूतान्तःकरणके आश्रित कर्मप्रेरित प्राणव्यापारानन्तर मायावश नाभिस्थ होकर परावाग् हुआ। हृदयस्थ होकर पश्यन्ती वाग् हुआ। विशुद्धचक्रस्थ होकर मध्यवाग् हुआ। फिर वक्त्र ( मुख ) स्थ होकर वैखरीवाङ्मयवेदादिरूपमें आविर्भूत हुआ। यह बात 'वागेव विश्वा भुवनानि जज्ञे' सूक्ष्मावाग् ही का समस्त प्रपञ्च विवर्त हुआ। 'वाचैव विश्वं बहुरूपं निबद्धं तमेवैकं प्रविभज्योपभुङ्क्ते' यह श्रुति भी उसी बातकी पोषिका है।

अकारं संनिधीकृत्य जगतां कारणत्वतः ।
इकारः सर्ववर्णानां शक्तित्वात्कारणं गतम् ॥ ७ ॥

अर्थ—अकारके सन्निधानसे जगत् कारण होनेसे शक्तिरूप इकार सब वर्णोंका कारण माना गया है। यहाँ 'गतम्' की जगह 'मतम्' उचित है।

जगत्स्रष्टुमभूदिच्छा यदा ह्यासीत्तदाभवत् ।
कामबीजमिति प्राहुर्मुनयो वेदपारगाः ॥ ८ ॥

अर्थ—जब ईश्वरकी इच्छा सृष्टि करनेकी हुई तब कामबीज ( इकार ) आविर्भूत हुआ।

अकारो ज्ञप्तिमात्रं स्यादिकारश्चित्कला मता ।
उकारो विष्णुरित्याहुर्व्यापकत्वान्महेश्वरः ॥ ९ ॥

अर्थ—अकार ज्ञानस्वरूप ( ब्रह्म ) है। इकार चित्कला माया है। उकार व्यापक होनेसे महेश्वरस्वरूप विष्णु भगवान् है। पूर्वोक्तार्थ ही 'द्विर्बद्धं सुबद्धं भवति' इस न्यायसे फिर कहा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

## ॠलृक् ॥ २ ॥

ॠलृक् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत् ।
तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत् ॥ १० ॥

अर्थ—वेदान्तसिद्धान्तमें परमेश्वरातिरिक्त कोई वस्तु नहीं है। यदि परमात्मा इरूप चित्कलाको आश्रयण कर जगद्रूप हुआ यह माना जाय तो अद्वैतसिद्धान्त भङ्ग हो जायगा। इस शङ्कापर समाधानरूप यह कारिका है। ॠ—परमेश्वरने लृ—मायानामक मनोवृत्तिको क्—अदर्शयत्—दिखलाया। यहाँ सर्वेश्वर पदसे यह सूचित किया कि माया परमेश्वरातिरिक्त नहीं है। उसी मनोवृत्तिको आश्रयण कर परमेश्वरने जगत्‌का उत्पादन (विवर्त) किया। 'ऋतं सत्यं परं ब्रह्म' यह श्रुति ही ॠ परमेश्वरका बोधक है, इसमें प्रमाण है। तत्पदार्थ परब्रह्मस्वरूप ॠ सत्य है।

वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते ।
चन्द्रचन्द्रिकयोर्यद्वद्यथा वागर्थयोरपि ॥ ११ ॥
स्वेच्छया स्वस्य चिच्छक्तौ विश्वमुन्मूलयत्यसौ ।
वर्णानां मध्यमं क्लीबमृलृवर्णद्वयं विभुः ॥ १२ ॥

अर्थ—जैसे चन्द्रमा और चन्द्रिकामें तथा वाग् और अर्थमें भेद नहीं है उसी प्रकार वृत्तिमान्—परमात्मा तथा वृत्ति—मायामें भेद नहीं है। केवल पार्थक्यकी प्रतीतिमात्र है। अतः वृत्तिके माननेपर भी अद्वैतसिद्धान्तकी हानि नहीं है।

स्वेच्छया अपनी चिच्छक्तिमें विश्वको प्रकाशित करता है, वह वर्णोंका मध्यम जो ॠ-लृवर्णद्वय है उनको क्लीव-अद्वैत ऋपि लोग जानते हैं।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

## एओङ् ॥ ३ ॥

एओङ् मायेश्वरात्मैक्यविज्ञानं सर्ववस्तुषु ।
साक्षित्वात्सर्वभूतानां स एक इति निश्चितम् ॥ १३ ॥

अर्थ—पूर्वमें 'जगद्रूपमजीजनत्' जगत्को पैदा किया ऐसा कहा गया है। इस तरह जन्यजनकभाव माननेसे अद्वैतहानि हो जायगी। अतः 'तत्सृष्ट्वा तदेवानुप्राविशत्' इस श्रुतिके आधारपर इस कारिकासे उस संशयको दूर करते हैं।

जन्यजनकभाव व्यवहारमात्र है। परमात्मा ही जगद्रूपसे वर्तमान है। अतः अद्वैतहानि नहीं है।

समष्टि-व्यष्टि-भेदसे असे युक्त इ = ए, असे युक्त उ = ओ इन दोनों वर्णोंसे माया तथा ईश्वरका सब वस्तुओंमें ऐक्य बोधन करते हैं। सर्वभूतोंके साक्षी होनेसे वह एक ही है।

## ऐऔच् ॥ ४ ॥

ऐऔच्ब्रह्मस्वरूपः सन् जगत्स्वान्तर्गतं ततः ।
इच्छया विस्तरं कर्तुमाविरासीन्महामुनिः ॥ १४ ॥

अर्थ—ततः—तब स्वान्तर्वर्ति जगत्का विस्तार करनेकी इच्छासे परमात्मा दीर्घाकारेकारयोगात्मक ज्ञानशक्तिरूप ऐकार तथा दीर्घाकारोकारयोगात्मक औकाररूप प्रज्ञानात्मा मायाशबलित होकर आविर्भूत हुए। 'अकारेकारोकाराणां ह्रस्वदीर्घाणां संयोगात्सर्वसम्भूतिरिष्यते' यह ईश्वरविमर्शिनीका वचन भी इसमें मूल है।

## हयवरट् ॥ ५ ॥

भूतपञ्चकमेतस्माद्धयवरण् महेश्वरात् ।
व्योमवाय्वम्बुवह्न्याख्यभूतान्यासीत्स एव हि ॥ १५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हकाराद् व्योमसंशञ्च यकाराद्वायुरुच्यते ।
रकाराद्वह्निस्तोयं तु वकारादिति सैव वाक् ॥ १६ ॥

अर्थ—पञ्चवर्णात्मक महेश्वरसे पञ्चमहाभूतकी सृष्टि हुई । यद्यपि यहाँ पृथ्वीकी सृष्टि नहीं कही गई है, तथापि उसकी भी उत्पत्ति अगली कारिकामें कहेंगे ।

## लण् ॥ ६ ॥

आधारभूतं भूतानामन्नादीनाञ्च कारणम् ।
अन्नाद्रेतस्ततो जीवः कारणत्वाल्लणीरितम् ॥ १७ ॥

अर्थ—सब भूतों ( जरायुज–मनुष्यादि–अण्डज–स्वेदज–मत्कुणादि–उद्भिज्ज–लतावृक्षादि ) का आधार तथा अन्नपानादिकोंकी कारणभूत पृथ्वीकी उत्पत्ति लरूप परमेश्वरसे हुई । अन्नसे रेतः ( वीर्य्य ), रेतसे शरीरकी उत्पत्ति होती है । शरीरकी उत्पत्ति ही यहाँ जीवकी उत्पत्ति समझनी चाहिये । इस प्रकार कारण होनेसे लरूपकारणक पृथ्वी है ।

## ञमङणनम् ॥ ७ ॥

शब्दस्पर्शौ रूपरसगन्धाश्च ञमङणनम् ।
व्योमादीनां गुणा ह्येते जानीयात्सर्ववस्तुषु ॥ १८ ॥

अर्थ—व्योमादिकारणीभूत तथा सूक्ष्मरूपेण सब वस्तुओंमें व्याप्त शब्दतन्मात्रादिकी उत्पत्ति ञमङणनरूप परमात्मासे हुई जाननी चाहिये । एते गुणाः तन्मात्ररूपेण व्योमादीनां कारणानीति जानीयादित्यर्थः । इससे 'गुणान्' द्वितीयान्त होना चाहिये यह शङ्का निरस्त हुई ।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

## झभञ् ॥ ८ ॥

वाक्पाणी च झभञासीद्विराड्रूपचिदात्मनः ।
सर्वजन्तुषु विज्ञेयं स्थावरादौ न विद्यते ॥ १९ ॥
वर्गाणां तुर्य्यवर्णा ये कर्मेन्द्रियमया हि ते ।

## घढधष् ॥ ९ ॥

घढधष्सर्वभूतानां पादपायू उपस्थकः ।
कर्मेन्द्रियगणा ह्येते जाता हि परमार्थतः ॥ २० ॥

अर्थ—वर्गोंके चतुर्थवर्ण कर्मेन्द्रियस्वरूप हैं । विराड्रूप चदात्मासे आविर्भूत झ—भरूपवर्णद्वय मुख तथा हस्तरूप कर्मेन्द्रिय बन गये । ये इन्द्रियाँ स्थावरके अतिरिक्त सब जन्तुओंमें हैं । परमात्मासे ही आविर्भूत घ—ढ—ध रूपवर्णत्रय सब भूतोंका चरण—पायू—मलत्यागेन्द्रिय—उपस्थ—प्रस्रावेन्द्रियता कर्मेन्द्रिय बन गये ।

## जबगडदश् ॥ १० ॥

श्रोत्रत्वङ्नयनघ्राणजिह्वाधीन्द्रियपञ्चकम् ।
सर्वेषामेव जन्तूनामीरितं जबगडदश् ॥ २१ ॥

अर्थ—'वर्गाणां मध्यवर्णात्थो ज्ञानेन्द्रियगणः स्मृतः' इस वचनके अनुसार ज ब ग ड द ये वर्णपञ्चक कर्ण—त्वक्—नेत्र—नासिका—जिह्वारूप सब प्राणियोंके यथासम्भव कर्मेन्द्रिय बन गये ।

## खफछठथचटतव् ॥ ११ ॥

प्राणादिपञ्चकञ्चैव मनोबुद्धिरहंकृतिः ।
बभूव कारणत्वेन खफछठथचटतव् ॥ २२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वर्गद्वितीयवर्णोत्थाः प्राणाद्याः पञ्चवायवः ।
मध्यवर्गत्रयाज्जाता अन्तःकरणवृत्तयः ॥ २३ ॥

अर्थ—ख फ छ ठ थ वर्गके इन द्वितीय वर्णोंसे प्राण-अपान-व्यान-उदान तथा समान ये पञ्च वायु उत्पन्न हुए। च ट त इन तीन मध्य वर्गके तृतीय वर्णोंसे अन्तःकरणकी मन-बुद्धि-अहंकार-रूप ये तीन वृत्तियाँ उत्पन्न हुई।

## कपय् ॥ १२ ॥

प्रकृतिं पुरुषं चैव सर्वेषामेव सम्मतम् ।
सम्भूतमिति विज्ञेयं कपय् स्यादिति निश्चितम् ॥ २४ ॥

अर्थ—आद्यन्त वर्गद्वय पवर्ग यवर्ग के प्रथम क प रूप दो वर्णोंके सम्पुटसे सर्वसम्मत प्रकृति-पुरुष का सम्भव हुआ। यद्यपि साङ्ख्याभिमत प्रकृति-पुरुष नित्य हैं, तथापि प्रकृति-पुरुषका सम्बन्ध होना ही उनकी उत्पत्ति यहाँ समझना चाहिये।

## शषसर् ॥ १३ ॥

सत्त्वं रजस्तम इति गुणानां त्रितयं पुरा ।
समाश्रित्य महादेवः शषसर् क्रीडति प्रभुः ॥ २५ ॥
शकाराद्राजसोत्पत्तिः षकारात्तामसोद्भवः ।
सकारात्सत्त्वसम्भूतिरिति त्रिगुणसम्भवः ॥ २६ ॥

अर्थ—सृष्टि के प्रथम सत्त्व–रज–तम इन तीनों गुणोंका कारणीभूत जिन शषस वर्णोंका समाश्रयण कर जगत्प्रभु महादेव क्रीड़ा किया करते हैं, उन्हीं वर्णोंसे उक्त गुणत्रितयकी उत्पत्ति हुई।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

## हल् ॥ १४ ॥

तत्त्वातीतः परः साक्षी सर्वानुग्रहविग्रहः ।
अहमात्मा परो हल् स्यामिति शम्भुस्तिरोदधे ॥ २७ ॥

अर्थ—सम्पूर्णतत्त्वोंका पैदा करनेवाला सर्वानुग्रहीता तथा निग्रहकारी तत्त्वागोचर पर-सर्वकारण हकार ('हकारः शिववर्णः स्यादिति शैवागमस्थितिः') इस वचन के अनुसार मैं वास्तविक अपने स्वरूप हो जाऊँ इस इच्छासे शङ्कर भगवान् अन्तर्हित हो गये।

पूर्वोक्त २७ कारिकाओंमें नन्दिकेश्वरने ब्रह्मस्वरूप तथा क्रमिक प्रपञ्चकी उत्पत्तिका वर्णन किया है। उन्हीं कारिकाओं-की 'तत्त्वविमर्शिनी' नामक व्याख्या संक्षिप्त रूपसे उपमन्युने की है।

तदनुसार ही समासतः मैंने हिन्दी व्याख्या की है। परन्तु इसको व्याख्या न कह कर स्वयमूहित इन सूत्रोंसे सृष्टिक्रमका उपपादनमात्र कहा जाय तो अनुचित न होगा। नन्दिकेश्वरने किस आधारपर १४ सूत्रोंसे सृष्टिका उपपादन किया यह भी चिन्तनीय है। समय मिलने पर अनुसन्धानपूर्वक इसकी आर्थिक-व्याख्या लिखनेका मैं यत्न करूँगा। इति शिवम्।

सभापति उपाध्याय,
प्रिन्सिपल,
बिरला संस्कृत कालेज, बनारस

ता० ५-१-४१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

## नन्दिकेश्वरकी दो कारिकाओंपर राजा बिरलाजीकी व्याख्या

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ १ ॥

भावार्थ—पूर्वशरीरके कर्मसमाप्तिके फलका नाम नृत्तावसान है। उसके फलसे वर्तमान शरीर नटराजराजो अर्थात् नट (शरीर) राज (भाव) राजो (अन्तःकरण मन आदि) है। वही चार अन्तःकरण सनकादि शरीर का कार्य पूरा करने के लिए 'उद्धर्तुकाम' होते हैं। अन्तःकरणकी चेष्टासे प्राणमें धक्का लगता है। उसीसे नवस्वर पाँचवर्ग निकलते हैं और बनते हैं, वही समझा जाता है, वही १४ सूत्र विमर्श से समझा गया है, जिसका नाम शिवसूत्रजल है। यही १४ सूत्र है, जिसका नाम व्याकरण है। शिव जलरूप है, और जलसे सब वस्तु संसारमें बनती है, वह अनेक होने से समझमें नहीं आती इससे जाल है।

इस उपर्युक्त श्लोकको अपराविद्यासे समझना चाहिये।

अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु ।
चित्कलामिम् समाश्रित्य जगद्रूप उणीश्वरः ॥ २ ॥

भावार्थ—सब शरीरोंका आकार ब्रह्मनाम रूप है। यह शरीर निर्गुण है। शरीर सब वस्तुरूप है, क्योंकि जब चित्त प्राणकी कला शरीरको प्रेरणा करती है, तभी इन्द्रियोंसे गुणका ग्रहण तथा त्याग होता है, अन्यथा नहीं। शरीर पृथिव्यादिरूप है, पृथिव्यादिमें चित्तकी कलाके आश्रयणसे वह जगत् उत्पन्न होता है तथा लय

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

होता है। उण् ही कर्म है, और उसके फलस्वरूप दूसरा शरीर धारण करे उस शरीरके कर्मफल भोगानेवाला ईश्वर नाम है।

यह श्लोक अपराके अनुमानसे समझा जाता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

# चतुर्दशसूत्रोंका भावार्थ

## पञ्चमहाभूतविस्तार स्वरसङ्ख्या ९

पञ्चभूतव्यक्तिके वास्ते सङ्ख्यामें व्यञ्जनव्यापार है। यही मिलकर १४ सूत्र है। अतएव "नवपञ्चवारम्" इति सङ्गतम्।

| | | | |
|---|---|---|---|
| १ अ<br>विस्तार<br>व्यापक | इ<br>चेतन<br>व्यक्ति | उ<br>वर्ण<br>कर्म | ण्<br>रूप<br>धर्म |
| २ ऋ<br>वर्ण<br>रूप | ऌ<br>क्रिया<br>कर्म | क्<br>धर्म<br>फल | |
| ३ एओङ्<br>शरीर<br>कर्मसे पूर्ण | ४ ऐऔच्<br>जगत् शरीर<br>अधिकार | ५ हयवरट्<br>वर्णानुसार<br>रूप भोग | |
| ६ लण्<br>अन्नाधार<br>भूत है | ७ ञमङणनम्<br>शब्दसे शरीरका<br>आवागमन है | ८ झभञ्<br>भूतोंमें<br>विहार और व्यापार है | |

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

<table>
<tr><td colspan="2">९ घढधष्<br>वर्णमें<br>त्याग और ग्रहण है</td><td colspan="2">१० जबगडदश्<br>पञ्चज्ञानेन्द्रियोंमें<br>विहार है</td></tr>
<tr><td colspan="2">११ खफछठथचटतव्<br>कर्मेन्द्रियोंका<br>व्यापार</td><td colspan="2">१२ कपय्<br>प्रकृति-पुरुषका<br>भाव मन<br>व्यापार</td></tr>
<tr><td>१३ श<br>जडचेतन<br>कर्म<br>धर्म</td><td>प<br>क्रिया<br>कर्म<br>धर्म</td><td>स<br>कर्म<br>भोग<br>फल</td><td>र्<br>वर्ण<br>रूप ( अर्थ )<br>भोग</td></tr>
<tr><td colspan="2">ह<br>सांख्यमें<br>वर्ण<br>रूप है</td><td colspan="2">ल्<br>वर्णमें<br>लेन<br>देन है</td></tr>
</table>

( राजा ) बलदेवदास बिरला

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

श्रीः

# ❀ कठोपनिषद् ❀

ॐ सह नाववतु ॥ सह नौ भुनक्तु ॥ सह वीर्यं करवावहै ॥ तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ । तस्य ह नचिकेता नाम पुत्र आस ॥ १ ॥ त ᳪ ह कुमार ᳪ सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश सोऽमन्यत ॥ २ ॥ पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः । अनन्दा नाम ते लोकास्तान्स गच्छति ता ददत् ॥ ३ ॥ स होवाच पितरं तत कस्मै मां दास्यसीति । द्वितीयं तृतीयं त ᳪ होवाच मृत्यवे त्वा ददामीति ॥ ४ ॥ बहूनामेमि प्रथमो बहूनामेमि मध्यमः । कि ᳪ स्विद्यमस्य कर्तव्यं यन्मयाद्य करिष्यति ॥५॥ अनुपश्य यथा पूर्वे प्रतिपश्य तथा परे । सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ॥ ६ ॥ वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् । तस्यै ता ᳪ शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥ ७ ॥ आशाप्रतीक्षे सङ्गत ᳪ सूनृतां चेष्टापूर्ते पुत्रपशू ᳪ श्च सर्वान् । एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे ॥८॥ तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः । नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व ॥ ९ ॥ शान्तसंकल्पः सुमना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा स्याद्वीतमन्युर्गौतमो माभिमृत्यो । त्वत्प्रसृष्टं माभिव-
देत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे ॥ १० ॥ यथा पुर-
स्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः । सुखं ँ
रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम्
॥ ११ ॥ स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न
जरया बिभेति । उभे तीर्त्वाशनायापिपासे शोकातिगो मोदते
स्वर्गलोके ॥ १२ ॥ स त्वमग्नि ँ स्वर्ग्यमध्येपि मृत्यो प्रब्रूहि
त ँ श्रद्दधानाय मह्यम् । स्वर्गलोका अमृतत्वं भजन्त
एतद्द्वितीयेन वृणे वरेण ॥ १३ ॥ प्र ते ब्रवीमि तदु मे निबोध
स्वर्ग्यमग्निं नचिकेतः प्रजानन् । अनन्तलोकाप्तिमथो प्रतिष्ठां
विद्धि त्वमेतन्निहितं गुहायाम् ॥ १४ ॥ लोकादिमग्निं तमु-
वाच तस्मै या इष्टका यावतीर्वा यथा वा । स चापि तत्प्र-
त्यवदद्यथोक्तमथास्य मृत्युः पुनरेवाह तुष्टः ॥ १५ ॥
तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः सृंकां च मामनेकरूपां
गृहाण ॥ १६ ॥ त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्म-
कृत्तरति जन्ममृत्यू । ब्रह्मजज्ञं देवमीड्यं विदित्वा निचा-
य्येमा ँ शान्तिमत्यन्तमेति ॥ १७ ॥ त्रिणाचिकेतस्त्रयमे-
तद्विदित्वा य एवं विद्वा ँ श्चिनुते नाचिकेतम् । स मृत्यु-
पाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥ १८ ॥
एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण ।

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व ॥ १९ ॥ येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके । एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः ॥ २० ॥ देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्मः । अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम् ॥ २१ ॥ देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुविज्ञेयमात्थ । वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित् ॥२२॥ शतायुषः पुत्रपौत्रान्वृणीष्व बहून्पशून्हस्तिहिरण्यमश्वान् । भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि ॥२३॥ एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च । महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि ॥२४॥ ये ये कामा दुर्लभा मर्त्यलोके सर्वान्कामा ँ श्छन्दतः प्रार्थयस्व । इमा रामाः सरथाः सतूर्या नहीदृशा लम्भनीया मनुष्यैः । आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः ॥ २५ ॥ श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः । अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्तगीते ॥ २६ ॥ न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा । जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥ २७ ॥ अजीर्यताममृतानामुपेत्य जीर्यन्मर्त्यः क्वधः स्थः प्रजानन् । अभिध्यायन्वर्ण-



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रतिप्रमोदानतिदीर्घे जीविते को रमेत ॥ २७ ॥ यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत् ॥ योऽयंवरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ॥२९॥

इति प्रथमेऽध्याये प्रथमा वल्ली ॥ १ ॥

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुष ꣳ सिनीतः । तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥ १ ॥ श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ॥ २ ॥ स त्वं प्रियान्प्रियरूपा ꣳ श्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः । नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ॥ ३ ॥ दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता । विद्याभीप्सितं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्तः ॥ ४ ॥ अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः । दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥ ५ ॥ न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् । अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ॥ ६ ॥ श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः ॥ ७ ॥ न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्य-

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

मानः । अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान्ह्यतर्क्यमणु-
प्रमाणात् ॥८॥ नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञा-
नाय प्रेष्ठ ॥ यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूया-
न्नचिकेतः प्रष्टा ॥ ९ ॥ जानाम्यह ँ्ँ शेवधिरित्यनित्यं
न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत् । ततो मया नचिकेतश्चितो-
ऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥ १० ॥ कामस्याप्तिं
जगतः प्रतिष्ठां क्रतोरानन्त्यमभयस्य पारम् । स्तोमं मह-
दुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः ॥११॥
तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्या-
त्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥ १२ ॥
एतच्छ्रुत्वा संपरिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य । स
मोदते मोदनीय ँ्ँ हि लब्ध्वा विवृत ँ्ँ सद्म नचिकेतसं
मन्ये ॥ १३ ॥ अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृता-
कृतात् । अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥१४॥
सर्वे वेदा यत्पदमामनन्ति तपा ँ्ँसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पद ँ्ँ संग्रहेण ब्रवीम्यो-
मित्येतत् ॥ १५ ॥ एतद्ध्येवाक्षरं ब्रह्म ह्येतदेवाक्षरं परम् ।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ १६ ॥
एतदालम्बन ँ्ँ श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं
ज्ञात्वा ब्रह्मलोके महीयते ॥ १७ ॥ न जायते म्रियते वा
विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् । अजो नित्यः शाश्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ १८ ॥ हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥ अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम् । तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः । आसीनो दूरं व्रजन्ति शयानो याति सर्वतः । कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति ॥ २० ॥ अशरीरꣳ शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥२१॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूꣳ स्वाम्॥२२॥ नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयात् ॥ २३ ॥ यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥२४॥

इति प्रथमेऽध्याये द्वितीया वल्ली ॥ २ ॥

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥ १ ॥ यः सेतुरीजानानामक्षरं ब्रह्म यत्परम् । अभयं तितीर्षतां पारं नाचिकेतꣳ शकेमहि ॥ २ ॥ आत्मानं रथिनं विद्धि शरीरं रथमेव तु ॥ बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ ३ ॥ इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥४॥

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा । तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ ५ ॥ यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ ६ ॥ यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः । न स तत्पदमाप्नोति सꣳसारं चाधिगच्छति ॥७॥ यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः । स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥ ८ ॥ विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥९॥ इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥१०॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥११॥ एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥१२॥ यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥१३॥ उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत । क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति ॥ १४ ॥ अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् । अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥ १५ ॥ नाचिकेतमुपाख्यानं मृत्युप्रोक्तꣳ सनातनम् । उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥ १६ ॥ य इमं परमं गुह्यं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रावयेद्ब्रह्म संसदि । प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते तदानन्त्याय कल्पत इति ॥ १७ ॥

इति प्रथमाऽध्याये तृतीया वल्ली ॥ ३ ॥

इति प्रथमोऽध्यायः समाप्तः ॥ १ ॥

पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ १ ॥ पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम् । अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥ २ ॥ येन रूपं रसं गन्धं शब्दान्स्पर्शां ७श्च मैथुनान् । एतेनैव विजानाति किमत्र परिशिष्यत एतद्वै तत् ॥ ३ ॥ स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ॥ महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ ४ ॥ य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् । ईशानं भूतभव्यस्य न ततो विजुगुप्सत एतद्वै तत् ॥ ५ ॥ यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत । गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत एतद्वै तत् ॥ ६ ॥ या प्राणेन संभवत्यदितिर्देवतामयी । गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत एतद्वै तत् ॥ ७ ॥ अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः । दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निरेतद्वै तत् ॥ ८ ॥ यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति । तं देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन एतद्वै तत् ॥ ९ ॥ यदेवेह

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

तदमुत्र यदमुत्र तदन्विह । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १० ॥ मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन । मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥११॥ अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सत एतद्वै तत् ॥ १२ ॥ अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः । ईशानो भूतभव्यस्य स एवाद्य स उ श्व एतद्वै तत् ॥ १३ ॥ यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति । एवं धर्मान्पृथक् पश्यंस्तानेवानुविधावति ॥१४॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम ॥ १५ ॥

इति द्वितीयेऽध्याये चतुर्थी वल्ली समाप्ता ॥ ४ ॥

पुरमेकादशद्वारमजस्यावक्रचेतसः । अनुष्ठाय न शोचति विमुक्तश्च विमुच्यत एतद्वै तत् ॥ १ ॥ ह ꣳस: शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥२॥ ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति । मध्ये वामनमासीनं विश्वेदेवा उपासते ॥ ३ ॥ अस्य विस्र ꣳसमानस्य शरीरस्थस्य देहिनः । देहाद्विमुच्यमानस्य किमत्र परिशिष्यत एतद्वै तत् ॥ ४ ॥ न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥ ५ ॥ हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् । यथा च मरणं प्राप्य आत्मा भवति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गौतम ॥ ६ ॥ योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥ ७ ॥ य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन एतद्वै तत् ॥ ८ ॥ अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ ९ ॥ वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ १० ॥ सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥ ११ ॥ एको वशी सर्व-भूतान्तरात्मा एकं रूपं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषा ँ सुख ँ शाश्वतं नेतरेषाम् ॥ १२ ॥ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥१३॥ तदेतदिति मन्यन्तेऽनि-र्देश्यं परमं सुखम् । कथं नु तद्विजानीयां किमु भाति विभाति वा ॥ १४ ॥ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ १५ ॥

इति द्वितीयेऽध्याये पञ्चमी वल्ली समाप्ता ॥ ५ ॥

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन एतद्वै तत् ॥ १ ॥ यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम् । महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥ २ ॥ भयादस्याग्निस्तपति भयात्तपति सूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥३॥ इह चेदशकद्बोद्धुं प्राक् शरीरस्य विस्रसः । ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥ ४ ॥ यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके । यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके ॥ ५ ॥ इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत् । पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥ ६ ॥ इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् । सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥ ७ ॥ अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च । यज्ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥ ८ ॥ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषी मनसाऽभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥ ९ ॥ यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥ १० ॥ तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् । अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥ ११ ॥ नैव वाचा न मनसा प्राप्तुं शक्यो न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चक्षुषा । अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥ १२ ॥
अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः । अस्तीत्येवोप-
लब्धस्य तत्त्वभावः प्रसीदति ॥ १३ ॥ यदा सर्वे प्रमुच्यन्ते
कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म
समश्नुते ॥ १४ ॥ यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥ १५ ॥ शतं
चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥१६॥
अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः ।
तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण । तं विद्याच्छुक्र-
ममृतं तं विद्याच्छुक्रममृतमिति ॥ १७ ॥ मृत्युप्रोक्तां नचि-
केतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् । ब्रह्म-
प्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव ॥१८॥

इति द्वितीयेऽध्याये षष्ठी वल्ली समाप्ता ॥ ६ ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति यजुर्वेदीयकठोपनिषत्समाप्ता ॥

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

॥ ॐ तत्सत् ॥

# ❀ प्रश्नोपनिषद् ❀

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेम देवहितं यदायुः॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ ॐ शान्तिः शान्तिः शान्तिः॥

ॐ सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौशल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः॥ १॥ तान्ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान्पृच्छथ यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति॥ २॥ अथ कबन्धी कात्यायन उपेत्य पप्रच्छ। भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्त इति॥ ३॥ तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोऽतप्यत स तपस्तप्त्वा स मिथुनमुत्पादयते। रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत इति॥ ४॥ आदित्यो ह वै प्राणो रयिरेव चन्द्रमा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च तस्मान्मूर्तिरेव रयिः ॥५॥ अथादित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान्प्राणान् रश्मिषु संनिधत्ते । यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं प्रकाशयति तेन सर्वान्प्राणान् रश्मिषु संनिधत्ते ॥ ६ ॥ स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते । तदेतदृचाभ्युक्तम् ॥ ७ ॥ विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् । सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥ ८ ॥ संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणञ्चोत्तरं च । तद्ये ह वै तदिष्टापूर्ते कृतमित्युपासते ते चान्द्रमसमेव लोकमभिजयन्ते । त एव पुनरावर्तन्ते तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते । एष ह वै रयिर्यः पितृयाणः ॥ ९ ॥ अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयन्त एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त इत्येष निरोधः । तदेष श्लोकः ॥ १० ॥ पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् । अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षळर आहुरर्पितमिति ॥ ११ ॥ मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणस्तस्मादेते ऋषयः शुक्ल इष्टिं कुर्वन्तीतर इतरस्मिन् ॥ १२ ॥ अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः प्राणं वा एते प्रस्कन्दन्ति । ये दिवा रत्या

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संयुज्यन्ते ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते ॥ १३ ॥ अन्नं वै प्रजापतिस्ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः प्रजायन्त इति ॥ १४ ॥ तद्ये ह वै तत्प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते । तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम् ॥ १५ ॥ तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति ॥

इति प्रथमः प्रश्नः ॥ १ ॥

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ । भगवन् कत्येव देवाः प्रजां विधारयन्ते कतर एतत्प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति ॥ १ ॥ तस्मै स होवाचाकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रञ्च । ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयामः ॥ २ ॥ तान्वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत्पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति ॥ ३ ॥ तेऽश्रद्दधाना बभूवुः सोऽभिमानादूर्ध्वमुत्क्रमत इव तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते तस्मिंश्च प्रतिष्ठमाने सर्व एव प्रतिष्ठन्ते । तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते, एवमस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्त एवं वाङ्मनश्चक्षुः श्रोत्रञ्च ते प्रीताः प्राणं स्तुन्वन्ति ॥ ४ ॥ एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः सदसच्चामृतं च यत् ॥५॥ अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

